०॥इतितृतीयाष्टकेप्रारभः॥०

श्रीगणेशाय नमः ॥ हरिः ॐ प्र य आरुः शितिपृष्ठस्य धासेरा मातरा विविशुः स
प्त वाणीः ॥ परिक्षिता पितरा सं चरेते प्र सर्स्राते दीर्घमायुः प्रयक्षे ॥ दिवक्षसो
धेनवो वृष्णो अश्वा देवीरा तस्थौ मधुमद्वहन्तीः ॥ ऋतस्य त्वा सदसि क्षेमयं
तं पर्येका चरति वर्तनिं गौः ॥ आ सीमरोहत्सुयमा भवन्तीः पतिश्चिकित्वान्रयि
विद्रयीणां ॥ प्र नीलपृष्ठो अतसस्य धासेस्ता अवासयत्पुरुधप्रतीकः ॥ महि त्वा
ष्ट्रमूर्जयन्तीरजुर्यं स्तभूयमानं वहतो वहन्ति ॥ व्यङ्गेभिर्दिद्युतानः सधस्थ एका
मिव रोदसी आ विवेश ॥ जानन्ति वृष्णो अरुषस्य शेवमुत ब्रध्नस्य शासने रणन्ति
॥ दिवोरुचः सुरुचो रोचमाना इळा येषां गण्या माहिना गीः ॥ १ ॥ उतो पितृभ्यां प्र

विदानु घोषं महो महद्भ्यामनयन्त शूषं ॥ उक्षा ह यत्र परि धानमक्तोरनु स्वं धाम ज
रितुर्ववक्ष ॥ अध्वर्युभिः पञ्चभिः सप्त विप्राः प्रियं रक्षन्ते निहितं पदं वेः ॥ प्राञ्चो
मदन्त्युक्षणो अजुर्या देवा देवानामनु हि व्रता गुः ॥ दैव्या होतारा प्रथमा न्यृञ्जे स
प्त पृक्षासः स्वधया मदन्ति ॥ ऋतं शंसन्त ऋतमित्त आहुरनु व्रतं व्रतपा दीध्यानाः
॥ वृषायन्ते महे अत्याय पूर्वीर्वृष्णे चित्राय रश्मयः सुयामाः ॥ देव होतर्मन्द्रतरश्चि २
कित्वान्महो देवान्रोदसी एह वक्षि ॥ पृक्षप्रयजो द्रविणः सुवाचः सुकेतव उषसो
रेवदूषुः ॥ उतो चिदग्ने महिना पृथिव्याः कृतं चिदेनः सं महे दशस्य ॥ इळामग्ने पु
रुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा ते

॥ २ ॥

सुमतिर्भूत्वस्मे ॥ २ ॥ अंजंति त्वामध्वरे देवयंतो वनस्पते मधुना दैव्येन ॥ यदू
र्ध्वस्तिष्ठा द्रविणेह धत्ताद्यद्वा क्षयो मातुरस्या उपस्थे ॥ समिद्धस्य श्रयमाणः पुरस्ता
द्ब्रह्म वन्वानो अजरं सुवीरं ॥ आरे अस्मदमतिं बाधमान उच्छ्रयस्व महते सौभगा
य ॥ उच्छ्रयस्व वनस्पते वर्ष्मन्पृथिव्या अधि ॥ सुमिती मीयमानो वर्चो धा यज्ञ
वाहसे ॥ युवा सुवासाः परिवीत आगात्स उ श्रेयान्भवति जायमानः ॥ तं धीरासः
कवय उन्नयंति स्वाध्यो मनसा देवयंतः ॥ जातो जायते सुदिनत्वे अह्नां समर्य आ
विदथे वर्धमानः ॥ पुनंति धीरा अपसो मनीषा देवया विप्र उदियर्ति वाचं ॥ २ ॥ या
न्वो नरो देवयंतो निमिम्युर्वनस्पते स्वधितिर्वा ततक्ष ॥ ते देवासः स्वरवस्तस्थिवां

सः प्रजावदस्मे दिधिषंतु रत्नं ॥ ये वृक्णासो अधि क्षमि निमितासो यतस्रुचः ॥
ते नो व्यंतु वार्यं देवत्रा क्षेत्रसाधसः ॥ आदित्या रुद्रा वसवः सुनीथा द्यावाक्षा
मा पृथिवी अंतरिक्षं ॥ सजोषसो यज्ञमवंतु देवा ऊर्ध्वं कृण्वंत्वध्वरस्य केतुं ॥ हंसा
इव श्रेणिशो यतानाः शुक्रा वसानाः स्वरवो न आगुः ॥ उन्नीयमानाः कविभिः
पुरस्ताद्देवा देवानामपि यंति पाथः ॥ शृंगाणीवेच्छृंगिणां सं ददृश्रे चषालवंतः स्व
रवः पृथिव्यां ॥ वाघद्भिर्वा विहवे श्रोषमाणा अस्माँ अवंतु पृतनाज्येषु ॥ वनस्पते श
तवल्शो वि रोह सहस्रवल्शा वि वयं रुहेम ॥ यं त्वामयं स्वधितिस्तेजमानः प्रणि
नाय महते सौभगाय ॥ ४ ॥ सखायस्त्वा ववृमहे देवं मर्तास ऊतये ॥ अपां नपातं

शुभ्रांसुदीदितिंसुप्रतूर्त्तिमनेहसं॥कायमानोवनात्वंयन्मातृरजगन्नपः॥न
तत्तेअग्नेप्रमृषेनिवर्त्तनंयद्दूरेसन्निहाभवः॥अतितृष्टंववक्षिथाथैवसुमना
असि॥प्रप्रान्येयंतिपर्यन्यआसतेयेषांसख्येअसिश्रितः॥ईयिवांसमति
स्रिधःशश्वतीरतिसश्चतः॥अन्वीमविंदन्निचिरासोअद्रुहोप्सुसिंहमिवश्रितं
॥ससृवांसमिवत्मनाग्निमित्थातिरोहितं॥ऐनंनयन्मातरिश्वापरावतोदेवेभ्यो
मथितंपरि॥५॥तंत्वामर्त्ताअगृभ्णतदेवेभ्योहव्यवाहन॥विश्वान्यद्यज्ञांअभिपा
सिमानुषतवक्रत्वायविष्ठ्य॥तद्भद्रंतवदंसनापाकायचिच्छदयति॥त्वांयद
ग्नेपशवःसमासतेसमिद्धमपिशर्वरे॥आजुहोतास्वध्वरंशीरंपावकशोचिषं॥

३

आशुंदूतमजिरंप्रत्नमीड्यंश्रुष्टीदेवंसपर्यत॥त्रीणिशतात्रीसहस्राण्यग्निंत्रिंश
च्चदेवानवचासपर्यन्॥औक्षन्घृतैरस्तृणन्बर्हिरस्माआदिद्धोतारंन्यसादयंत॥
॥६॥त्वामग्नेमनीषिणःसम्राजंचर्षणीनां॥देवंमर्त्तासइंधतेसमध्वरे॥त्वांयज्ञे
ष्वृत्विजमग्नेहोतारमीळते॥गोपाऋतस्यदीदिहिस्वेदमे॥सघायस्तेददाशति
समिधाजातवेदसे॥सोअग्नेधत्तेसुवीर्यंसपुष्यति॥सकेतुरध्वराणामग्निर्देवे
भिरागमत्॥अंजानःसप्तहोतृभिर्हविष्मते॥प्रहोत्रेपूर्व्यंवचोग्नयेभरताबृह
त्॥विपांज्योतींषिबिभ्रतेनवेधसे॥७॥अग्निंवर्धंतुनोगिरोयतोजायतउक्थ्यः॥
महेवाजायद्रविणायदर्शतः॥अग्नेयजिष्ठोअध्वरेदेवान्देवयतेयज॥होतामंद्रोवि

राजस्यत्तिस्त्रिधः॥सनः पावक दीदिहि द्युमदस्मेसुवीर्यं॥भवास्तोतृभ्योअं
तमस्वस्तये॥तंत्वाविप्राविपन्यवोजागृवांसः समिंधते॥हव्यवाहममर्त्यंसहोवृ
धं॥८॥अग्निर्होतापुरोहितोध्वरस्यविचर्षणिः॥सवेदयज्ञमानुषक्॥सहव्य
वाळमर्त्यउशिग्दूतश्चनोहितः॥अग्निर्धियासमृण्वति॥अग्निर्धियासचेततिके
तुर्यज्ञस्यपूर्व्यः॥अर्थंह्यस्यतरणि॥अग्निंसूनुंसनश्रुतंसहसोजातवेदसं॥व
ह्निंदेवाअकृण्वत॥अदाभ्यःपुरएताविशामग्निर्मानुषीणां॥तूर्णीरथःसदान
वः॥९॥साह्वान्विश्वाअभियुजःक्रतुर्देवानाममृक्तः॥अग्निस्तुविश्रवस्तमः॥
अभिप्रयांसिवाहसादाश्वांअश्नोतिमर्त्यः॥क्षयंपावकशोचिषः॥परिविश्वानि ५

सुधिताग्नेरश्याममन्मभिः॥विप्रासोजातवेदसः॥अग्नेविश्वानिवार्यावाजेषुस
निषामहे॥त्वेदेवासएरिरे॥१०॥इंद्राग्नीआगतंसुतंगीर्भिर्नभोवरेण्यं॥अस्य
सवा पातंधियेषिता॥इंद्राग्नीजरितुःसचायज्ञोजिगातिचेतनः॥अयापातमिमंसुतं॥इंद्र
मग्निंकविच्छदायज्ञस्यजूत्यावृणे॥तासोमस्येहतृंपतां॥तोशासावृत्रहणाहुवेसजि
त्वानापराजिता॥इंद्राग्नीवाजसातमा॥प्रवामर्चंत्युक्थिनोनीथाविदोजरितारः
॥इंद्राग्नीइषआवृणे॥११॥इंद्राग्नीनवतिंपुरोदासपत्नीरधूनुतं॥साकमेकेनक
र्मणा॥इंद्राग्नीअपसस्पर्युपप्रयंतिधीतयः॥ऋतस्यपथ्या३अनु॥इंद्राग्नीतवि
षाणिवांसधस्थानिप्रयांसिच॥युवोरप्तूर्यंहितं॥इंद्राग्नीरोचनादिवःपरिवाजेषु

भूषथः॥ तद्वांचेतिप्रवीर्यं॥ १२॥ प्रवोदेवायाग्नयेबर्हिष्ठमर्चास्मै॥ गमद्देवेभिरास
नोयजिष्ठोबर्हिरासदत्॥ ऋतावायस्यरोदसीदक्षंसचंतऊतयः॥ हविष्मंतस्त
मीळतेतंसनिष्यंतोवसे॥ सयंताविप्रएषांसयज्ञानामथाहिषः॥ अग्निंतंवोदुव
स्यतदातायोवनितामघं॥ सनःशर्माणिवीतयेग्निर्यच्छतुशंतमा॥ यतोनःप्रुष्ण
वद्वसुदिविक्षितिभ्योअप्स्वा॥ दीदिवांसमपूर्व्यंवस्वीभिरस्यधीतिभिः॥ ऋक्वाणो
अग्निमिंधतेहोतारंविश्पतिंविशां॥ उतनोब्रह्मन्नविषउक्थेषुदेवहूतमः॥ शंनः
शोचामरुद्वृधोग्नेसहस्रसातमः॥ नूनोरास्वसहस्रवत्तोकवत्पुष्टिमद्वसु॥ द्यु
मदग्नेसुवीर्यंवर्षिष्ठमनुपक्षितं॥ १३॥ आहोतामंद्रोविदथान्यस्थात्सत्योयज्वा ५

कवितमःसवेधाः॥ विद्युद्रथःसहसस्पुत्रोअग्निःशोचिष्केशःपृथिव्यांपाजो
अश्रेत्॥ अयामितेनमउक्तिंजुषस्वऋतावस्तुभ्यंचेततेसहस्वः॥ विद्वाँआवक्षि
विदुषोनिषत्सिमध्यआबर्हिरूतयेयजत्र॥ द्रवतांतउषसावाजयंतीअग्नेवात
स्यपथ्याभिरच्छ॥ यत्सीमंजंतिपूर्व्यंहविर्भिरावंधुरेवतस्थतुर्दुरोणे॥ मित्रश्चतुभ्यं
वरुणःसहस्वोग्नेविश्वेमरुतःसुम्नमर्चन्॥ यच्छोचिषासहसस्पुत्रतिष्ठाअभिक्षि
तीःप्रथयन्सूर्योनॄन्॥ वयंतेअद्यररिमाहिकाममुत्तानहस्तानमसोपसद्य॥ यजि
ष्ठेनमनसायक्षिदेवानस्रेधतामन्मनाविप्रोअग्ने॥ त्वद्धिपुत्रसहसोविपूर्वीर्देव
स्ययंत्यूतयोविवाजाः॥ त्वंदेहिसहस्रिणंरयिंनोद्रोघेणवचसासत्यमग्ने॥ तुभ्यंदक्ष

कविक्रतुर्यो यानीमा देवमर्तासो अध्वरे अकर्म॥ त्वं विश्वस्य सुरथस्य बोधि सर्वं तद
ग्ने अमृत स्वदेह॥१४॥ विपाजसा पृथुना शोशुचानो बाधस्व द्विषो रक्षसो अमी
वाः॥ सुशर्मणो बृहतः शर्मणि स्यामग्नेरहं सुहवस्य प्रणीतौ॥ त्वं नो अस्या उषसो
व्युष्टौ त्वं सूर उदिते बोधि गोपाः॥ जन्मेव नित्यं तनयं जुषस्व स्तोमं मे अग्ने तन्वा सु
जात॥ त्वं नृचक्षा वृषभानु पूर्वीः कृष्णास्वग्ने अरुषो वि भाहि॥ वसो नेषि च पर्षि
चात्यंहः कृधी नो राय उशिजो यविष्ठ॥ अषाळ्हो अग्ने वृषभो दिदीहि पुरो विश्वाः सौ
भगा संजिगीवान्॥ यज्ञस्य नेता प्रथमस्य पायोर्जातवेदो बृहतः सुप्रणीते॥ अच्छि
द्रा शर्म जरितः पुरूणि देवाँ अच्छा दीद्यानः सुमेधाः॥ रथो न सस्निरभि वक्षि वाजमग्ने त्वं

रोदसी नः सुमेके॥ प्र पीपय वृषभ जिन्व वाजानग्ने त्वं रोदसी नः सुदोघे॥ देवेभिर्दे
व सुरुचा रुचानो मा नो मर्तस्य दुर्मतिः परि ष्ठात्॥ इळामग्ने पुरुदंसं सनिं गोः शश्व
त्तमं हवमानाय साध॥ स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥१५॥
अयमग्निः सुवीर्यस्येशे महः सौभगस्य॥ राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथा
नां॥ इमं नरो मरुतः सश्चता वृधं यस्मिन्रायः शेवृधासः॥ अभि ये सन्ति पृतनासु
दूढ्यो विश्वाहा शत्रुमादभुः॥ स त्वं नो रायः शिशीहि मीढ्वो अग्ने सुवीर्यस्य॥ तुविद्यु
म्न वर्षिष्ठस्य प्रजावतोऽनमीवस्य शुष्मिणः॥ चक्रिर्यो विश्वा भुवनाभि सासहिश्चक्रि
र्देवेष्वा दुवः॥ आ देवेषु यतत आ सुवीर्ये आ शंस उत नृणां॥ मा नो अग्नेऽमतये मावी

रतायैरीरधः॥ मागोतायैसहसस्पुत्रमानिदेपद्वेषांस्याकृधि॥ शग्धिवाजस्यसु
भगप्रजावतोग्नेबृहतोअध्वरे॥ संरायाभूयसासृजमयोभुनातुविद्युम्नयश
स्वता॥१६॥ समिध्यमानःप्रथमानुधर्मासमक्तुभिरज्यतेविश्ववारः॥ शोचिष्केशो
घृतनिर्णिक्पावकःसुयज्ञोअग्निर्यजथायदेवान्॥ यथायजोहोत्रमग्नेपृथिव्या
यथादिवोजातवेदश्चिकित्वान्॥ एवानेनहविषायक्षिदेवान्मनुष्वद्यज्ञंप्रतिरेममद्य॥
त्रीण्यायूंषितवजातवेदस्तिस्रआजानीरुषसस्तेअग्ने॥ ताभिर्देवानामवोयक्षि
विद्वानथाभवयजमानायशंयोः॥ अग्निंसुदीतिंसुदृशंगृणंतोनमस्यामस्त्वेड्यं
जातवेदः॥ त्वांदूतमरतिंहव्यवाहंदेवाअकृण्वन्नमृतस्यनाभिं॥ यस्त्वद्धोतापूर्वो ८

अग्नेयजीयान्द्विताचसत्तास्वधयाचशंभुः॥ तस्यानुधर्मप्रयजाचिकित्वोथानोधाअ
ध्वरंदेववीतौ॥१७॥ भवानोअग्नेसुमनाउपेतौसखेवसख्येपितरेवसाधुः॥ पुरु
द्रुहोहिक्षितयोजनानांप्रतिप्रतीचीर्दहतादरातीः॥ तपोष्वग्नेअंतरांअमित्रान्
तपाशंसमररुषःपरस्य॥ तपोवसोचिकितानोअचित्तान्वितेतिष्ठंतामजराअ
यासः॥ इध्मेनाग्नइच्छमानोघृतेनजुहोमिहव्यंतरसेबलाय॥ यावदीशेब्रह्मणावं
दमानइमांधियंशतसेयायदेवीं॥ उच्छोचिषासहसस्पुत्रस्तुतोबृहद्वयःशशमा
नेषुधेहि॥ रेवदग्नेविश्वामित्रेषुशंयोर्मर्मृज्मातेतन्वंभूरिकृत्वः॥ कृधिरत्नंसुस
नितर्धनानांसघेदग्नेभवसियत्समिद्धः॥ स्तोतुर्दुरोणेसुभगस्यरेवत्सृप्राकरस्ना

दधिषेवपूंषि ॥१८॥ अग्निंहोतारंप्रवृणेमियेधेगृत्संकविंविश्वविदममूरं ॥ सनोय
क्षद्देवतातप्रवृणेमियेधेगृत्संकविंविश्वविदममूरं ॥ सनोयक्षद्देवतातायजी
यान्रायेवाजायवनतेमघानि ॥ प्रतेअग्नेहविष्मतीमियर्त्यछासुद्युम्नांराति
नींघृताचीं ॥ प्रदक्षिणिद्देवतातिमुराणःसंरातिभिर्वसुभिर्यज्ञमश्रेत् ॥ सतेजीय
सामनसावो तउतशिक्षस्वपत्यस्यशिक्षोः ॥ अग्नेरायोनृतमस्यप्रभूतौभूयाम
तेसुष्टुतयश्चवस्वः ॥ भूरीणिहित्वेदधिरेअनीकाग्नेदेवस्ययज्यवोजनासः ॥ सआ
वहदेवतातिंयविष्ठशर्धोयदद्यदिव्यंयजासि ॥ यत्वाहोतारमनजन्मियेधेनिषादयं
तोयजथायदेवाः ॥ सत्वंनोअग्नेवितेहबोध्यधिश्रवांसिधेहिनस्तनूषु ॥१९॥ अ

ग्निमुषसमश्विनादधिक्रांव्युष्टिषुहवतेवह्निरुक्थैः ॥ सुज्योतिषोनःशृण्वंतुदेवाः
सजोषसोअध्वरंवावशानाः ॥ अग्नेत्रीतेवाजिनात्रीसधस्थातिस्रस्तेजिह्वाऋत
जातपूर्वीः ॥ तिस्रउतेतन्वोदेववातास्ताभिर्नःपाहिगिरोअप्रयुछन् ॥ अग्नेभू
रीणितवजातवेदोदेवस्वधावोमृतस्यनाम ॥ याश्चमायामायिनांविश्वमिन्वत्वेपूर्वीः
संदधुःपृष्टबंधो ॥ अग्निर्नेताभगइवक्षितीनांदैवीनांदेवऋतुपाऋतावा ॥ सवृत्रहा
सनयोविश्ववेदाःपर्षद्विश्वातिदुरितागृणंतं ॥ दधिक्रामग्निमुषसंचदेवींबृहस्पतिंस
वितारंचदेवं ॥ अश्विनामित्रावरुणाभगंचवसून्रुद्राँआदित्याँइहहुवे ॥२०॥ इमं
नोयज्ञममृतेषुधेहीमाहव्याजातवेदोजुषस्व ॥ स्तोकानामग्नेमेदसोघृतस्यहोतःप्रा

शान: प्रथमो निषद्य॥ घृतवंत: पावक ते स्तोका: श्चोतंति मेदस:॥ स्वधर्मे देववीतये
श्रेष्ठं नो धेहि वार्यं॥ तुभ्यं स्तोका घृतश्चुतोऽग्ने विप्राय संत्य॥ ऋषि: श्रेष्ठ: समिध्य
से यज्ञस्य प्राविता भव॥ तुभ्यं श्चोतंत्यध्रिगो शचीव: स्तोकासो अग्ने मेदसो घृत
स्य॥ कविशस्तो बृहता भानुनागा हव्या जुषस्व मेधिर॥ ओजिष्ठं ते मध्यतो मेद उद्भृतं
प्र ते वयं ददामहे॥ श्चोतंति ते वसो स्तोका अधि त्वचि प्रति तान्देवशो विहि॥२१॥ अयं
सो अग्निर्यस्मिन्त्सोममिंद्र: सुतं दधे जठरे वावशान:॥ सहस्रिणं वाजमत्यं न सप्तिं स
सवान्त्सन्स्तूयसे जातवेद:॥ अग्ने यत्ते दिवि वर्च: पृथिव्यां यदोषधीष्वप्स्वा यजत्र॥ ये
नांतरिक्षमुर्वाततंथ त्वेष: स भानुरर्णवो नृचक्षा:॥ अग्ने दिवो अर्णमच्छा जिगास्यच्छा दे

१०

वाँ ऊचिषे धिष्ण्या ये॥ या रोचने परस्तात्सूर्यस्य याश्चावस्तादुपतिष्ठंत आप:॥
पुरीष्यासो अग्नय: प्रावणेभि: सजोषस:॥ जुषंतां यज्ञमद्रुहोऽनमीवा इषो म
ही:॥ इळामग्ने पुरुदंसं सनिं गो: शश्वत्तमं हवमानाय साध॥ स्यान्न: सूनुस्तनयो
विजावाग्ने सा ते सुमतिर्भूत्वस्मे॥२२॥ निर्मथित: सुधित आ सधस्थे युवा कवि
रध्वरस्य प्रणेता॥ जूर्यत्स्वग्निरजरो वनेष्वत्रा दधे अमृतं जातवेदा:॥ अमंथिष्टां
भारता रेवदग्निं देवश्रवा देववात: सुदक्षं॥ अग्ने वि पश्य बृहताभि रायेषां नो ने
ता भवतादनु द्यून्॥ दश क्षिप: पूर्व्यं सीमजीजनन्त्सुजातं मातृषु प्रियं॥ अग्निं
स्तुहि दैववातं देवश्रवो यो जनानामसद्वशी॥ नि त्वा दधे वर आ पृथिव्या इळा

यास्वदेसुदिनत्वे अन्हां॥ दृषद्वत्यां मानुष आपयायां सरस्वत्यां रेवदग्ने दिदीहि

॥ इळां०॥ स्वानि०॥ २३॥ अग्ने सहस्व पृतना अभिमातीरपास्य॥ दुष्टरस्तरंन

रातीर्वर्चोधा यज्ञवाहसे॥ अग्न इळा समिध्यसे वीतिहोत्रो अमर्त्यः॥ जुषस्व

सूनो अध्वरं॥ अग्ने द्युम्नेन जागृवे सहसः सूनवाहुत॥ एदं बर्हिः सदो मम॥ अ

ग्ने विश्वेभिरग्निभिर्देवेभिर्महया गिरः॥ यज्ञेषु य उ चायवः॥ अग्ने दा दाशुषे र

यिं वीरवंतं परीणसं॥ शिशीहि नः सूनुमतः॥ २४॥ अग्ने दिवः सूनुरसि प्रचेता

स्तना पृथिव्या उत विश्ववेदाः॥ ऋधग्देवां इह यजा चिकित्वः॥ अग्निः सनोति वीर्या

णि विद्वान्सनोति वाजममृताय भूषन्॥ सनो देवां एह वहा पुरुक्षो॥ अग्निर्द्यावा

वापृथिवी विश्वजन्ये आ भाति देवी अमृते अमूरः॥ क्षयन्वाजैः पुरुश्चंद्रो नमो

भिः॥ अग्न इंद्रश्च दाशुषो दुरोणे सुतावतो यज्ञमिहोप यातं॥ अमर्धंता सो

मपेयाय देवा॥ अग्ने अपां समिध्यसे दुरोणे नित्यः सूनो सहसो जातवेदः॥ स

धस्थानि महयमान ऊती॥ २५॥ वैश्वानरं मनसाग्निं निचाय्या हविष्मंतो अनु

षत्यं स्वर्विदं॥ सुदानुं देवं रथिरं वसूयवो गीर्भी रण्वं कुशिकासो हवामहे॥ तं शु

भ्रमग्निमवसे हवामहे वैश्वानरं मातरिश्वानमुक्थ्यं॥ बृहस्पतिं मनुषो देवता

तये विप्रं श्रोतारमतिथिं रघुष्यदं॥ अश्वो न क्रंदं जनिभिः समिध्यते वैश्वानरः

कुशिकेभिर्युगेयुगे॥ सनो अग्निः सुवीर्यं स्वश्व्यं दधातु रत्नममृतेषु जागृविः॥ प्र

यंतु वाजास्तविषीभिरग्नयः शुभेसंमिश्लाः पृषतीरयुक्षत॥ बृहदुक्षोमरुतो
विश्ववेदसः प्रवेपयंतिपर्वतां अदाभ्याः॥ अग्निश्रियोमरुतोविश्वकृष्टयआत्वे
षमुग्रमवईमहेवयं॥ तेस्वानिनोरुद्रियावर्षनिर्णिजः सिंहानहेषक्रतवः सुदा
नवः॥२६॥ व्रातंव्रातंगणंगणंसुशस्तिभिरग्नेर्भामंमरुतामोजईमहे॥ पृषद
श्वासोअनवभ्रराधसोगंतारोयज्ञंविदथेषुधीराः॥ अग्निरस्मिजन्मनाजा
तवेदाघृतंमेचक्षुरमृतंमआसन्॥ अर्कस्त्रिधातूरजसोविमानोजस्रोघर्मो
हविरस्मिनाम॥ त्रिभिः पवित्रैरपुपोध्यर्कंहृदामतिंज्योतिरनुप्रजानन्॥ वर्षि
ष्ठंरत्नमकृतस्वधाभिरादिद्द्यावापृथिवीपर्यपश्यत्॥ शतधारमुत्समक्षीयमा ११

श्रं

णंविपश्चितंपितरंवक्त्वानां॥ मेळिंमदंतंपित्रोरुपस्थेतंरोदसीपिपृतंसत्यवाचं॥
॥२७॥ प्रवोवाजाअभिद्यवोहविष्मंतोघृताच्या॥ देवांजिगातिसुम्नयुः॥ ईळे
अग्निंविपश्चितंगिरायज्ञस्यसाधनं॥ श्रुष्टीवानंधितावानं॥ अग्नेशकेमते
वयंयमंदेवस्यवाजिनः॥ अतिद्वेषांसितरेम॥ समिध्यमानोअध्वरेग्निः पावक
ईड्यः॥ शोचिष्केशस्तमीमहे॥ पृथुपाजाअमर्त्योघृतनिर्णिक्स्वाहुतः॥ अ
ग्निर्यज्ञस्यहव्यवाट्॥२८॥ तंसबाधोयतस्रुचइत्थाधियायज्ञवंतः॥ आचक्रु
रग्निमूतये॥ होतादेवोअमर्त्यः पुरस्तादेतिमायया॥ विदथानिप्रचोदयन्॥ वा
जीवाजेषुधीयतेध्वरेषुप्रणीयते॥ विप्रोयज्ञस्यसाधनः॥ धियाचक्रेवरेण्यो

भूतानां गर्भमादधे॥ दक्षस्य पितरं तना॥ नित्वा दधे वरेण्यं दक्षस्येळा सहस्कृत
॥ अग्ने सुदीतिमुशिजं॥ २९॥ अग्निं यंतुरमप्तुरमृतस्य योगे वनुषः॥ विप्रा वा
जैः समिंधते॥ ऊर्जो नपातमध्वरे दीदिवांसमुप द्यवि॥ अग्निमीळे कविक्रतुं॥
ईळेन्यो नमस्यस्तिरस्तमांसि दर्शतः॥ समग्निरिध्यते वृषा॥ वृषो अग्निः समि
ध्यते श्वो न देववाहनः॥ तं हविष्मंत ईळते॥ वृषणं त्वा वयं वृषन्वृषणः समिधी
महि॥ अग्ने दीद्यतं बृहत्॥ ३०॥ अग्ने जुषस्व नो हविः पुरोळाशं जातवेदः॥ प्रा
तः सावे धियावसो॥ पुरोळा अग्ने पचतस्तुभ्यं वा घा परिष्कृतः॥ तं जुषस्व यवि
ष्ठ्य॥ अग्ने वीहि पुरोळाशमाहुतं तिरो अह्न्यं॥ सहसः सूनुरस्यध्वरे हितः॥ मा

१२

ध्यंदिने सवने जातवेदः पुरोळाशमिह कवे जुषस्व॥ अग्ने यह्वस्य तव भागधेयं न
प्रमिनंति विदथेषु धीराः॥ अग्ने तृतीये सवने हि कानिषः पुरोळाशं सहसः सून
वाहुतं॥ अथा देवेष्वध्वरं विपन्यया धा रत्नवंतममृतेषु जागृविं॥ अग्ने वृधान ऽ
आहुतिं पुरोळाशं जातवेदः॥ जुषस्व तिरो ऽ अह्न्यं॥ ३१॥ अस्तीदमधिमंथनम
स्ति प्रजननं कृतं॥ एतां विश्पत्नीमा भराग्निं मंथाम पूर्वथा॥ अरण्योर्निहितो जा
तवेदा गर्भ इव सुधितो गर्भिणीषु॥ दिवे दिव ईड्यो जागृवद्भिर्हविष्मद्भिर्मनुष्येभिरग्निः
॥ उत्ताना यामव भरा चिकित्वान्त्सद्यः प्रवीता वृषणं जजान॥ अरुषस्तूपो रुशदस्य
पाज इळायास्पुत्रो वयुने ऽजनिष्ट॥ इळायास्त्वा पदे वयं नाभा पृथिव्या अधि॥ जात

वेदो नि धीमह्यग्ने हव्याय वोळ्हवे॥ मंथता नरः कविमद्वयंतं प्रचेतसममृतं सुप्र
तीकं॥ यज्ञस्य केतुं प्रथमं पुरस्तादग्निं नरो जनयता सुशेवं॥ ३२॥ यदी मंथंति बा
हुभिर्वि रोचतेऽश्वो न वाज्यरुषो वनेष्वा॥ चित्रो न यामन्नश्विनोरनिवृत्तः परि वृण
क्त्यश्मनस्तृणा दहन्॥ जातो अग्नी रोचते चेकितानो वाजी विप्रः कविशस्तः सुदा
नुः॥ यं देवास ईड्यं विश्वविदं हव्यवाहमदधुरध्वरेषु॥ सीद होतः स्व उ लोके चिकि
त्वान्सादया यज्ञं सुकृतस्य योनौ॥ देवावीर्देवान्हविषा यजास्यग्ने बृहद्यजमाने
वयो धाः॥ कृणोत धूमं वृषणं सखायोऽस्रेधंत इतन वाजमछ॥ अयमग्निः पृतना
षाट् सुवीरो येन देवासो असहंत दस्यून्॥ अयं ते योनिरृत्वियो यतो जातो अरोचथाः॥

१३

तं जानन्नग्न आ सीदाथा नो वर्धया गिरः॥ ३३॥ तनूनपादुच्यते गर्भ आसुरो न
राशंसो भवति यद्विजायते॥ मातरिश्वा यदमिमीत मातरि वातस्य सर्गो अभव
त्सरीमणि॥ सुनिर्मथा निर्मथितः सुनिधा निहितः कविः॥ अग्ने स्वध्वरा कृणु दे
वान्देवयते यज॥ अजीजनन्नमृतं मर्त्यासोऽस्रेमाणं तरणिं वीळुजंभं॥ दश स्वसारो
अग्रुवः समीचीः पुमांसं जातमभि सं रभंते॥ प्र सप्तहोता सनकादरोच मातु त
रुपस्थे यदशोचदूधनि॥ न नि मिषति सुरणो दिवेदिवे यदसुरस्य जठरादजाय
त॥ अमित्रायुधो मरुतामिव प्रयाः प्रथमजा ब्रह्मणो विश्वमिद्विदुः॥ द्युम्नवद्ब्र
ह्म कुशिकास एरिर एकएको दमे अग्निं समीधिरे॥ यदद्य त्वा प्रयति यज्ञे अस्मिन्होत

श्चिकित्वो वृणीमहीह ॥ ध्रुवमया ध्रुवमुताशमिष्ठाः प्रजानन्विद्वाँ उप याहि
सोमं ॥ २५ ॥ ॥ इति श्री तृतीयाष्टके प्रथमो ध्यायः ॥ ॥ हरिः ॐ ॥ इच्छन्ति त्वा सोम्या
सः सखायः सुन्वन्ति सोमं दधति प्रयांसि ॥ तितिक्षन्ते अभिशस्तिं जनानामिंद्र त्वदा
कश्चन हि प्रकेतः ॥ न ते दूरे परमा चिद्रजांस्या तु प्र याहि हरिवो हरिभ्यां ॥ स्थिराय
वृष्णे सवना कृतेमा युक्ता ग्रावाणः समिधाने अग्नौ ॥ इंद्रः सुशिप्रो मघवा तरुत्रो म
हाव्रातस्तुविकूर्मिर्ऋघावान् ॥ यदुग्रो धा बाधितो मर्त्येषु क्व१ त्या ते वृषभ वीर्या
णि ॥ त्वं हि ष्मा च्यावयन्नच्युतान्येको वृत्रा चरसि जिघ्नमानः ॥ तव द्यावापृथिवी पर्व
तासो नु व्रताय निमितेव तस्थुः ॥ उताभये पुरुहूत श्रवोभिरेको दृळ्हमवदो वृत्रहा सन् ॥

इमे चिदिंद्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते ॥ १ ॥ प्र सू त इंद्र प्रवता ह
रिभ्यां प्र ते वज्रः प्रमृणन्नेतु शत्रून् ॥ जहि प्रतीचो अनूचः पराचो विश्वं सत्यं कृणु
हि विष्टमस्तु ॥ यस्मै धायुरदधा मर्त्यायाभक्तं चिद्भजते गेह्यं१ सः ॥ भद्रा त इंद्र सु
मतिर्घृताची सहस्रदाना पुरुहूत रातिः ॥ सहदानुं पुरुहूत क्षियंतमहस्तमिंद्र सं
पिणक्कुणारुं ॥ अभि वृत्रं वर्धमानं पियारुमपादमिंद्र तवसा जघंथ ॥ नि सामना
मिषिरामिंद्र भूमिं महीमपारां सदने ससत्थ ॥ अस्तभ्नाद्द्यां वृषभो अंतरिक्षमर्षंत्वा
पस्त्वयेह प्रसूताः ॥ अलातृणो वल इंद्र व्रजो गोः पुरा हंतोर्भयमानो व्यार ॥ सुगा
न्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमंतीः ॥ २ ॥ एको द्वे वसुमती समी

ऋ०भा०३

वींद्र आपप्रोपृथिवीमुतद्यां॥उतोंतरिक्षादभिनःसमीक‌इषोरथीःसयुजःशूर

वाजान्॥दिशःसूर्योनमिनातिप्रदिष्टादिवेदिवेहर्यश्वप्रसूताः॥संयदानळध्वन

आदिदश्वैर्विमोचनंकृणुतेतत्वस्य॥दिदृक्षंतउषसोयामन्नक्तोर्विवस्वत्यामहिचित्र श्री

मनीकं॥विश्वेजानंतिमहिनायदागादिंद्रस्यकर्मसुकृतापुरूणि॥महिज्योतिर्निहि

तंवक्षणास्वामापक्वंचरतिबिभ्रतीगौः॥विश्वंस्वाद्मसंभृतमुस्रियायांयत्सी

मिंद्रोअदधाद्भोजनाय॥इंद्रदृंह्यामकोशाअभूवन्यज्ञायशिक्षगृणतेसखिभ्यः

॥दुर्मायवोदुरेवामर्त्यासोनिषंगिणोरिपवोहंत्वासः॥२॥संघोषःशृण्वेवमैरमित्रैर्ज

हीन्येष्वशनिंतपिष्ठां॥वृश्चेमधस्ताद्विरुजासहस्वजहिरक्षोमघवन्रंधयस्व॥उद्वृह

॥१५॥

क्षःसहमूलमिंद्रवृश्चामध्यंप्रत्यग्रंशृणीहि॥आकीवतःसललूकंचकर्थब्रह्म

द्विषेतपुषिंहेतिमस्य॥स्वस्तयेवाजिभिश्चप्रणेतःसंयन्महीरिषआसत्सिपूर्वीः॥

रायोवंतारोबृहतःस्यामास्मेअस्तुभगइंद्रप्रजावान्॥आनोभरभगमिंद्रद्युमंतंनि

तेदेष्णस्यधीमहिप्ररेके॥उर्वइवपप्रथेकामोअस्मेतमापृणवसुपतेवसूनां॥इमंका

मंमंदयागोभिरश्वैश्चंद्रवताराधसापप्रथश्च॥स्वर्यवोमतिभिस्तुभ्यंविप्राइंद्रायवा

हःकुशिकासोअक्रन्॥आनोगोत्रादर्दृहिगोपतेगाःसमस्मभ्यंसनयोयंतुवाजाः॥

दिवक्षाअसिवृषभसत्यशुष्मोस्मभ्यंसुमघवन्बोधिगोदाः॥शुनंहुवेममघवानमिं

द्रमस्मिन्भरेनृतमंवाजसातौ॥शृण्वंतमुग्रमूतयेसमत्सुघ्नंतंवृत्राणिसंजितंधनानां॥४॥

शासद्वह्निर्दुहितुर्नप्त्यंगाद्विद्वाँऋतस्यदीधितिंसपर्यन्॥पितायत्रदुहितुःसे
कमृञ्जन्त्संशग्म्येनमनसादधन्वे॥नजामयेतान्वोरिक्थमारैक्चकारगर्भंसनि
तुर्निधानं॥यदीमातरोजनयन्तवह्निमन्यःकर्तासुकृतोरन्यऋन्धन्॥अग्निर्ज
ज्ञेजुह्वा३रेजमानोमहस्पुत्राँअरुषस्यप्रयक्षे॥महान्गर्भोमह्याजातमेषांमही
प्रवृद्धर्यश्वस्ययज्ञैः॥अभिजैत्रीरसचन्तस्पृधानंमहिज्योतिस्तमसोनिरजानन्॥
तंजानतीःप्रत्युदायन्नुषासःपतिर्गवामभवदेकइन्द्रः॥वीळौसतीरभिधीराअतृन्दन्
प्राचाहिन्वन्मनसासप्तविप्राः॥विश्वामविन्दन्पथ्यामृतस्यप्रजानन्नित्तानमसा
विवेश॥५॥विदद्यदीसरमारुग्णमद्रेर्महिपाथःपूर्व्यंसध्र्यक्कः॥अग्रंनयत्सुपद्यक्ष

राणामच्छारवंप्रथमाजानतीगात्॥अगच्छदुविप्रतमःसखीयन्नसूदयत्सुकृते
गर्भमद्रिः॥ससानमर्योयुवभिर्मखस्यन्नथाभवदङ्गिराःसद्योअर्चन्॥सतःस
तःप्रतिमानंपुरोभूर्विश्वावेदजनिमाहन्तिशुष्णं॥प्रणोदिवःपदवीर्गव्युरर्चन्स
खासखीँरमुञ्चन्निरवद्यात्॥निगव्यतामनसासेदुरर्कैःकृण्वानासोअमृतत्वाय
गातुं॥इदंचिन्नुसदनंभूर्येषांयेनमासाँअसिषासन्नृतेन॥संपश्यमानाअमद
न्नभिस्वंपयःप्रत्नस्यरेतसोदुघानाः॥विरोदसीअतपद्घोषएषांजातेनिष्ठामदधु
र्गोषुवीरान्॥६॥सजातेभिर्वृत्रहासेदुहव्यैरुदुस्रियाअसृजदिन्द्रोअर्कैः॥उरूच्य
स्मैघृतवद्भरन्तीमधुस्वाद्मदुदुहेजेन्यागौः॥पित्रेचिच्चक्रुःसदनंसमस्मैमहित्विषी

मत्सुकृतोविहिख्यन्॥विष्कभ्नंतःस्कंभनेनाजनित्रीआसीनाउर्ध्वंरभसंविमि
न्वन्॥महीयदिधिषणाशिश्नथेधात्सद्योवृधंविभ्वं१रोदस्योः॥गिरोयस्मिंनन
वद्याःसमीचीर्विश्वाइंद्रायतविषीरनुत्ताः॥मह्यातेसख्यंवश्मिशक्तीरावृत्रघ्नेनि
युतोयंतिपूर्वीः॥महिस्तोत्रमवआगन्मसूरेरस्माकंसुमघवन्बोधिगोपाः॥महि
क्षेत्रंपुरुश्चंद्रंविविद्वानादित्सखिभ्यश्चरथंसमैरत्॥इंद्रोनृभिरजनद्दीद्यानःसा
कंसूर्यमुषसंगातुमग्निं॥७॥अपश्चिदेषविभ्वो१दमूनाःप्रसध्रीचीरसृजद्विश्वश्चं
द्राः॥मध्वःपुनानाःकविभिःपवित्रैर्द्युभिर्हिन्वंत्यक्तुभिर्धनुत्रीः॥अनुकृष्णेवसुधि
तीजिहातेउभेसूर्यस्यमंहनायजत्रे॥परियत्तेमहिमानंवृजध्यैसखायइंद्रकाम्याऋ

२७

जिप्याः॥पतिर्भववृत्रहन्सूनृतानांगिरांविश्वायुर्वृषभोवयोधाः॥आनोगहि
सख्येभिःशिवेभिर्महान्महीभिरूतिभिःसरण्यन्॥तमंगिरस्वन्नमसासपर्यन्
नव्यंकृणोमिसन्यसेपुराजां॥द्रुहोवियाहिबहुलाअदेवीःस्वश्चनोमघवन्सातयेधाः
॥मिहःपावकाःप्रतताअभूवन्स्वस्तिनःपिपृहिपारमासां॥इंद्रत्वंरथिरःपाहिनो
रिषोमक्षूमक्षूकृणुहिगोजितोनः॥अदेदिष्टवृत्रहागोपतिर्गाअंतःकृष्णाँअरुषैर्धा
मभिर्गात्॥प्रसूनृतादिशमानऋतेनदुरश्चविश्वाअवृणोदपस्वाः॥शुनं०॥शृण्वंत
मुग्रं०॥८॥इंद्रसोमंसोमपतेपिबेमंमाध्यंदिनंसवनंचारुयत्ते॥प्रप्रुथ्याशिप्रेमघ
वन्नृजीषिन्विमुच्याहरीइहमादयस्व॥गवाशिरंमंथिनमिंद्रशुक्रंपिबासोमंररिमा

तेमदाय।। ब्रह्मकृतामारुतेनागणेनसजोषारुद्रैस्तृपदावृषस्व।। येतेशुष्मंयेतवि
षीमवर्धन्नर्चंतइंद्रमरुतस्तओजः।। माध्यंदिनेसवनेवज्रहस्तपिबारुद्रेभिःसग
णः सुशिप्र।। तइन्न्वस्यमधुमद्विविप्रइंद्रस्यशर्धोमरुतोयआसन्।। येभिर्वृत्रस्येषि
तोविवेदामर्मणोमन्यमानस्यमर्म।। मनुष्वदिंद्रसवनंजुषाणः पिबासोमंशश्वतेवी
र्याय।। सआववृत्स्वहर्यश्वयज्ञैः सरण्युभिरपोअर्णासिसर्षि।।९।। त्वमपोय
द्धवृत्रंजघन्वाँअत्याँइवप्रासृजः सर्तवाजौ।। शयानमिंद्रचरतावधेनवव्रिवांसं
परिदेवीरदेवं।। यजामइन्नमसावृद्धमिंद्रंबृहंतमृष्वमजरंयुवानं।। यस्यप्रियेममतु
र्यज्ञियस्यनरोदसीमहिमानंममाते।। इंद्रस्यकर्मसुकृतापुरूणिव्रतानिदेवानमिनंति १८

विश्वे।। दाधारयः पृथिवींद्यामुतेमांजजानसूर्यमुषसंसुदंसाः।। अद्रोघसत्यंत
वतन्महित्वंसद्योयज्जातोअपिबोहसोमं।। नद्यावइंद्रतवसस्तओजोनाहानमा
साः शरदोवरंत।। त्वंसद्योअपिबोजातइंद्रमदायसोमंपरमेव्योमन्।। यद्धद्यावापृ
थिवीआविवेशीरथाभवः पूर्व्यः कारुधायाः।।१०।। अहन्नहिंपरिशयानमर्णओजा
यमानंतुविजाततव्यान्।। नतेमहित्वमनुभूदधद्यौर्यदन्ययास्फिग्याक्षामवस्थाः
।। यज्ञोहितइंद्रवर्धनोभूदुतप्रियः सुतसोमोमियेधः।। यज्ञेनयज्ञमवयज्ञियः संय
ज्ञस्तेवज्रमहिहत्यआवत्।। यज्ञेनेंद्रमवसाचक्रेअर्वागैनंसुम्नायनव्यसेववृत्यां।।
यस्तोमेभिर्वावृधेपूर्व्येभिर्योमध्यमेभिरुतनूतनेभिः।। विवेषयन्माधिषणाज

जानन्त्स्तैवेपुरायायपरिदं महः ।। अंहसोयत्रपीपरद्यथानोनावेवयांतमुभयेहवंते ।।
आपूर्णोअस्यकलशःस्वाहासेक्तेवकोशंसिसिचेपिबध्यै ।। समुप्रियाआ
ववृत्रन्मदायप्रदक्षिणिदभिसोमासइंद्रं ।। नत्वागभीरःपुरुहूतसिंधुर्नाद्रयःप
रिषंतोवरंत ।। इत्थासखिभ्यइषितोयदिंद्रादृह्लंचिदरुजोगव्यमूर्वं ।। शुनंहुवेम० ।।
रश्वंत० ।।११।। प्रपर्वतानामुशतीउपस्थादश्वेइवविषितेहासमाने ।। गावेवशुभ्रेमा
तरारिहाणेविपाट्छुतुद्रीपयसाजवेते ।। इंद्रेषितेप्रसवंभिक्षमाणेअछासमुद्रंर
थ्येवयाथः ।। समाराणेऊर्मिभिःपिन्वमानेअन्यावामन्यामप्येतिशुभ्रे ।। अछासिंधुं
मातृतमामयासंविपाशमुर्वींसुभगामगन्म ।। वत्समिवमातरासंरिहाणेसमानं ११

योनिमनुसंचरंती ।। एनावयंपयसापिन्वमानाअनुयोनिंदेवकृतंचरंतीः ।। न
वर्तवेप्रसवःसर्गतक्तःकिंयुर्विप्रोनद्योजोहवीति ।। रमध्वंमेवचसेसोम्यायऋता
वरीरुपमुहूर्तमेवैः ।। प्रसिंधुमछाबृहतीमनीषावस्युरह्वेकुशिकस्यसूनुः ।।१२।।
इंद्रोअस्माँअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिंनदीनां ।। देवोनयत्सविताःसुपाणिस्त
स्यवयंप्रसवेयामउर्वीः ।। प्रवाच्यंशश्वधावीर्यं१तदिंद्रस्यकर्मयदहिंविवृश्चत् ।।
विवज्रेणपरिषदोजघानायन्नापोयनमिछमानाः ।। एतद्वचोजरितर्मापिमृष्ठाःआ
यत्तेघोषानुत्तरायुगानि ।। उक्थेषुकारोप्रतिनोजुषस्वमानोनिकःपुरुषत्रानमस्ते
।। ओषुस्वसारःकारवेशृणोतययौवोदूरादनसारथेन ।। निषूनमध्वंभवतासुपारा

अपोअक्षाःसिंधवस्रोत्याभिः॥आतेकारोशृणवामावचांसिययाथदूरादनसा
रथेन॥नितेनंसैपीप्यानेवयोषामर्यायेवकंन्याशश्वचैते॥१३॥यदंगत्वाभरताः
संतरेयुर्गव्यन्ग्रामइषितइंद्रजूतः॥अर्षादहप्रसवःसर्गतक्तआवोवृणेसुमतिं
यज्ञियानां॥अतारिषुर्भरतागव्यवःसमभक्तविप्रःसुमतिंनदीनां॥प्रपिंन्वध्वमि
षयंतीःसुराधाआवक्षणाःपृणध्वंयातशीभं॥उद्वऊर्मिःशम्याहंत्वापोयोक्त्रा
णिमुंचत॥मादुष्कृतौव्येनसाघ्न्यौशुनमारतां॥१४॥इंद्रःपूर्भिदातिरद्दासम
र्कैर्विदद्वसुर्दयमानोविशत्रून्॥ब्रह्मजूतस्तन्वावावृधानोभूरिदात्रआपृणद्रोद
सीउभे॥मखस्यतेतविषस्यप्रजूतिमियर्मिवाचममृतायभूषन्॥इंद्रक्षितीनाम

सिमानुषीणांविशांदैवीनामुतपूर्वयावा॥इंद्रोवृत्रमवृणोच्छर्धनीतिःप्रमायिना
ममिनाद्वर्पणीतिः॥अहन्व्यंसमुशधग्वनेष्वाविर्धेनाअकृणोद्राम्याणां॥इंद्रःस्व
र्षाजनयन्नहानिजिगायोशिग्भिःपृतनाअभिष्टिः॥प्रारोचयन्मनवेकेतुमह्ना
मविंदज्ज्योतिर्बृहतेरणाय॥इंद्रस्तुजोबर्हणाआविवेशनृवद्दधानोनर्यापुरूणि॥
अचेतयद्धियइमाजरित्रेप्रेमंवर्णमतिरच्छुक्रमासां॥१५॥महोमहानिपनयंत्य
स्येंद्रस्यकर्मसुकृतापुरूणि॥वृजनेनवृजिनान्संपिपेषमायाभिर्दस्यूँरभिभूत्यो
जाः॥युधेंद्रोमह्नावरिवश्चकारदेवेभ्यःसत्पतिश्चर्षणिप्राः॥विवस्वतःसदनेअ
स्यतानिविप्राउक्थेभिःकवयोगृणंति॥सत्रासाहंवरेण्यंसहोदांससवांसंस्वर

पश्चदेवीः॥ ससानयः पृथिवीं द्यामुतेमामिंद्रं मदंत्यनु धीरणासः॥ ससानात्याँ
उत सूर्यं ससानेंद्रः ससान पुरुभोजसं गां॥ हिरण्ययमुत भोगं ससान हत्वी दस्यु
न्प्रार्यं वर्णमावत्॥ इंद्र ओषधीरसनोदहानि वनस्पतीँरसनोदंतरिक्षं॥ विभेद
वलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनां॥ शुनं०॥ शृण्वंतं॥१६॥ तिष्ठा हरी र
थ आ युज्यमाना याहि वायुर्न नियुतो नो अच्छ॥ पिबास्यंधो अभिसृष्टो अस्मे इं
द्रः स्वाहा ररिमा ते मदाय॥ उपाजिरा पुरुहूताय सप्ती हरी रथस्य धूर्ष्वा युनज्मि॥ द्र
वद्यथा संभृतं विश्वतश्चिदुपेमं यज्ञमा वहात इंद्रं॥ उपो नयस्व वृषणा तपुष्पोतेम
व त्वं वृषभः स्वधावः॥ ग्रसेतामश्वा वि मुचेह शोणा दिवेदिवे सदृशीरद्धि धानाः॥ ब्रह्म

णा ते ब्रह्मयुजा युनज्मि हरी सखाया सधमाद आशू॥ स्थिरं रथं सुखमिंद्राधिति
ष्ठन्प्रजानन्विद्वाँ उप याहि सोमं॥ मा ते हरी वृषणा वीतपृष्ठा नि रीरमन्यजमा
नासो अन्ये॥ अत्यायाहि शश्वतो वयं तेऽरं सुतेभिः कृणवाम सोमैः॥१७॥ तवा
यं सोमस्त्वमेह्यर्वाङ् शश्वत्तमं सुमना अस्य पाहि॥ अस्मिन्यज्ञे बर्हिष्या निष
द्या दधिष्वेमं जठर इंदुमिंद्र॥ स्तीर्णं ते बर्हिः सुत इंद्रः सोमः कृता धाना अत्तवे ते ह
रिभ्यां॥ तदोकसे पुरुशाकाय वृष्णे मरुत्वते तुभ्यं राता हवींषि॥ इमं नरः पर्वतास्तु
भ्यमापः समिंद्र गोभिर्मधुमंतमक्रन्॥ तस्यागत्या सुमना ऋष्व पाहि प्रजानन्वि
द्वान्पथ्या अनु स्वाः॥ याँ आभजो मरुत इंद्र सोमे ये त्वामवर्धन्नभवन्गणस्ते॥ ते

भिरेतं सजोषा वावशानो ऽग्नेः पिबजिह्वया सोममिंद्र।। इंद्र पिब स्वधया चित्सु
तस्याग्नेर्वा पाहि जिह्वया यजत्र।। अध्वर्योर्वा प्रयतं शक्र हस्ताद्धोतुर्वा यज्ञं हविषो
जुषस्व।। शुनं हुवेम०।। शृण्वंतं०।।१०।। इमामूषु प्रभृतिं सातये धाः शश्वच्छश्वदू
तिभिर्यादमानः।। सुतेसुते वावृधे वर्धनेभिर्यः कर्मभिर्महद्भिः सुश्रुतो भूत्।। इं
द्राय सोमाः प्रदिवो विदाना ऋभुर्येभिर्वृषपर्वा विहायाः प्रयम्यमानान्प्रतिषूगृ
भायेंद्र पिब वृषधूतस्य वृष्णः।। पिबा वर्धस्व तव घा सुतास इंद्र सोमासः प्रथमा उ
तेमे।। यथापिबः पूर्व्यां इंद्र सोमाँ एवा पाहि पन्यो अद्या नवीयान्।। महाँ अमत्रो वृज
ने विरप्श्युग्रं शवः पत्यते धृष्ण्वोजः।। नाह विव्याच पृथिवी चनैनं यत्सोमासो २३

हर्यश्वममंदन्।। महाँ उग्रो वावृधे वीर्याय समाचक्रे वृषभः काव्येन।। इंद्रो भगो
वाजदा अस्य गावः प्रजायंते दक्षिणा अस्य पूर्वीः।।११।। प्रयत्सिंधवः प्रसवं य
थायन्नापः समुद्रं रथ्येव जग्मुः। अतश्चिदिंद्रः सदसो वरीयान्यदीं सोमः पृणाति
दुग्धो अंशुः।। समुद्रेण सिंधवो यादमाना इंद्राय सोमं सुषुतं भरंतः।। अंशुं दुहंति ह
स्तिनो भरित्रैर्मध्वः पुनंति धारया पवित्रैः।। ह्रदा इव कुक्षयः सोमधानाः समीवि
व्याच सवना पुरूणि।। अन्ना यदिंद्रः प्रथमा व्याश वृत्रं जघन्वाँ अवृणीत सोमं
।। आतू भर माकिरेतत्परिष्ठाद्विद्मा हि त्वा वसुपतिं वसूनां।। इंद्र यत्ते माहिनं दत्रम
स्त्यस्मभ्यं तद्धर्यश्व प्रयंधि।। अस्मे प्रयंधि मघवन्नृजीषिन्निंद्र रायो विश्ववारस्य भूरेः।।

अस्मेशतंशरदोजीवसेधाअस्मेवीरांछश्वत्तइंद्रशिप्रिन् ॥ शुनंहुवेम० ॥ शृण्वं
तः ॥२०॥ वार्त्रहत्यायशवसेपृत्तनाषाह्यायच ॥ इंद्रत्वावर्त्तयामसि ॥ अर्वाची
नंसुतेमनउत्तचक्षुःशत्तक्रत्तो ॥ इंद्रकृण्वंतुवाघत्तः ॥ नामानितेशत्तक्रत्तोविश्वा
भिर्गीर्भिरीमहे ॥ इंद्राभिमातिषाह्ये ॥ पुरुष्टुत्तस्यधामभिःशत्तेनमहयामसि ॥ इंद्र
स्यचर्षणीधृतः ॥ इंद्रंवृत्रायहंत्तवेपुरुहूत्तमुपब्रुवे ॥ भरेषुवाजसात्तये ॥२१॥ वा
जेषुसासहिर्भवत्वामीमहेशत्तक्रतो ॥ इंद्रवृत्रायहंत्तवे ॥ द्युम्नेषुपृत्तनाज्येपृत्सु
तूर्षुश्रवःसुच ॥ इंद्रसाक्ष्वाभिमात्तिषु ॥ शुष्मिंत्तमंनऊत्तयेद्युम्निनंपाहिजागृविं ॥
इंद्रसोमंशतक्रत्तो ॥ इंद्रियाणिशत्तक्रत्तोयात्तेजनेषुपंचसु ॥ इंद्रत्तानित्तआवृणे ॥

२२

अगन्निंद्रश्रवोबृहद्युम्नंदधिष्व ॥ दुष्टरं ॥ उत्तेशुष्मंत्तिरामसि ॥ अर्वावत्तोनआ
गह्यथोशक्रपरावत्तः ॥ उलोकोयस्तेअद्रिवइंद्रेहतत्तआगहि ॥२२॥ अभितष्टे
वदीधयामनीषामत्योनवाजीसुधुरोजिहानः ॥ अभिप्रियाणिमर्मृशत्परा
णिकवींरिच्छामिसंदृशेसुमेधाः ॥ इनोत्तपृच्छजनिमाकवीनांमनोधृत्तःसुकृत्त
स्तक्षत्तद्यां ॥ इमाउत्तेप्रण्यो३वर्धमानामनोवात्ताअधनुधर्मणिग्मन् ॥ निषीमि
दत्रगुह्यादधानाउत्तक्षत्रायरोदसीसमंजन् ॥ संमात्राभिर्ममिरेयेमुरुर्वीअंत
र्महीसमृत्तेधायसेधुः ॥ आतिष्ठंतंपरिविश्वेअभूषंछ्रियोवसानःश्चरतिःस्व
रोचिः ॥ महत्तद्वृष्णोअसुरस्यनामाविश्वरूपोअमृत्तानित्तस्थौ ॥ असूतपूर्वोवृ

षभो ज्यायानिमा अस्य शुरुधः संति पूर्वीः॥ दिवो नपाता विदथस्य धीभिः क्ष
त्रं राजाना प्रदिवो दधाते॥२३॥ त्रीणि राजाना विदथे पुरूणि परि विश्वानि भूष
थः सदांसि॥ अपश्यमत्र मनसा जगन्वान्व्रते गंधर्वां अपि वायुकेशान्॥ त
दिन्न्वस्य वृषभस्य धेनोरा नामभिर्ममिरे सक्म्यं गोः॥ अन्यदन्यदसुर्यं वसाना
नि मायिनो ममिरे रूपमस्मिन्॥ तदिन्न्वस्य सवितुर्नकिर्मे हिरण्ययीममतिं या
मशिश्रेत्॥ आ सुष्टुती रोदसी विश्वमिन्वे अपीव योषा जनिमानि वव्रे॥ युवं प्रत्न
स्य साधथो महो यद्दैवी स्वस्तिः परि णः स्यातं॥ गोपाजिह्वस्य तस्थुषो विरूपा वि
श्वे पश्यंति मायिनः कृतानि॥ शुनं हुवेम०॥ शृण्वंतमुग्रं०॥२४॥ इंद्रं मतिर्हृद

आ वच्यमानाछा पतिं स्तोमतष्टा जिगाति॥ या जागृविर्विदथे शस्यमानेंद्र
यत्ते जायते विद्धि तस्य॥ दिवश्चिदा पूर्व्या जायमाना वि जागृविर्विदथे शस्यमा
ना॥ भद्रा वस्त्राण्यर्जुना वसाना सेयमस्मे सनजा पित्र्या धीः॥ यमा चिद
त्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात्॥ वपूंषि जाता मिथुना सचेते तमो
हना तपुषो बुध्न एता॥ नकिरेषां निंदिता मर्त्येषु ये अस्माकं पितरो गोषु योधाः
॥ इंद्र एषां दृंहिता माहिनावानुद्गोत्राणि ससृजे दंसनावान्॥ सखा ह यत्र स
खिभिर्नवग्वैरभिज्ञ्वा सत्वभिर्गा अनुग्मन्॥ सत्यं तदिंद्रो दशभिर्दशग्वैः सू
र्यं विवेद तमसि क्षियंतं॥२५॥ इंद्रो मधु संभृतमुस्रियायां पद्वद्विवेद शफवन्न

मेगोः॥ गुहाहितंगुह्यंगूळ्हमप्सु हस्तेदधेदक्षिणेदक्षिणावान्॥ ज्योतिर्वृणी
तत्तमसोविजानन्नारेस्यामदुरितादभीके॥ इमागिरःसोमपाःसोमवृद्धजु
षस्वेंद्रपुरुतमस्यकारोः॥ ज्योतिर्यज्ञायरोदसीअनुष्यादारेस्यामदुरितस्य
भूरेः॥ भूरिचिद्धितुजतोमर्त्यस्यसुपारासोवसवोबर्हणावत्॥ शुनंहुवेम॥
शृण्वंतं॥२५॥ ॥इतिश्रीतृतीयाष्टकेद्वितीयोध्यायः॥ ॥हरिः ॐ इंद्रत्वावृ
षभंवयंसुतेसोमेहवामहे॥ सपाहिमध्वोअंधसः॥ इंद्रक्रतुविदंसुतंसोमंह
र्यपुरुष्टुत॥ पिबावृषस्वतातृपिं॥ इंद्रप्रणोधितावानंयज्ञंविश्वेभिर्देवेभिः॥ ति
रस्तवानविश्पते॥ इंद्रसोमाःसुताइमेतवप्रयंतिसत्पते॥ क्षयंचंद्रासइंदवः॥ दधि

२५

ष्वाजठरेसुतंसोममिंद्रवरेण्यं॥ तवद्युक्षासइंदवः॥१॥ गिर्वणःपाहिनःसुतंमधो
र्धाराभिरज्यसे॥ इंद्रत्वादातमिद्यशः॥ अभिद्युम्नानिवनिनइंद्रंसचंतेअक्षि
ता॥ पीत्वीसोमस्यवावृधे॥ अर्वावतोनआगहिपरावतश्चवृत्रहन्॥ इमाजुष
स्वनोगिरः॥ यदंतरापरावतमर्वावतंचहूयसे॥ इंद्रेहततआगहि॥२॥ आतू
नइंद्रमद्र्यग्घुवानःसोमपीतये॥ हरिभ्यांयाह्यद्रिवः॥ सत्तोहोतानऋत्वियस्ति
स्तिरेबर्हिरानुषक्॥ अयुज्रन्प्रातरद्रयः॥ इमाब्रह्मब्रह्मवाहःक्रियंतआबर्हि
सीदः॥ वीहिशूरपुरोळाशं॥ रारंधिसवनेषुणएषुस्तोमेषुवृत्रहन्॥ उक्थेष्विंद्र
गिर्वणः॥ मतयःसोमपामुरुंरिहंतिशवसस्पतिं॥ इंद्रंवत्संनमातरः॥३॥ समंद

स्वाह्यंधसोरा। धसेतन्वामहे नस्तोतारंनिदेकरः॥ वयमिंद्रत्वायवोहविष्मंतो
जरामहे॥ उतत्वमस्मयुर्वसो॥ मारेअस्मद्विमुमुचोहरिप्रियार्वाङ्याहि॥ इं
द्रस्वधावोमत्स्वेह॥ अर्वाचंत्वासुखेरथेवहतामिंद्रकेशिना॥ घृतस्नूबर्हिरा
सदे॥ ४॥ उपनःसुतमागहिसोममिंद्रगवाशिरं॥ हरिभ्यांयस्ते अस्मयुः॥ त
मिंद्रमदमागहिबर्हिष्ठांग्रावभिःसुतं॥ कुविन्न्वस्यतृप्णवः॥ इंद्रमित्थागिरो
ममाच्छागुरिषिताइतः। आवृतेसोमपीतये॥ इंद्रंसोमस्यपीतयेस्तोमैरिहहवा
महे॥ उक्थेभिःकुविदागमत्॥ इंद्रसोमाःसुताइमेतान्दधिष्वशतक्रतो॥ जठरे
वाजिनीवसो॥ ५॥ विद्माहित्वाधनंजयंवाजेषुदधृषंकवे॥ अधातेसुम्नमीमहे॥

२६

इममिंद्रगवाशिरंयवाशिरंचनःपिब॥ आगत्यावृषभिःसुतं॥ तुभ्येदिंद्रस्वओ
क्ये३सोमंचोदामिपीतये॥ एषरारंतुतेहृदि॥ त्वांसुतस्यपीतयेप्रत्नमिंद्रहवाम
हे। कुशिकासोअवस्यवः॥ ६॥ आयाह्यर्वाङुपवंधुरेष्ठास्तवेदनुप्रदिवःसोम
पेयं॥ प्रियासखायाविमुचोपबर्हिस्त्वामिमेहव्यवाहोहवंते॥ आयाहिपूर्वीरति
चर्षणीराँअर्यआशिषउपनोहरिभ्यां॥ इमाहित्वामतयस्तोमतष्टाइंद्रहवंतेस
ख्यंजुषाणाः॥ आनोयज्ञंनमोवृधंसजोषाइंद्रदेवहरिभिर्याहितूयं॥ अहंहित्वा
मतिभिर्जोहवीमिघृतप्रयाःसधमादेमधूनां॥ आचत्वामेतावृषणावहातोह
रीसखायासुधुरास्वंगा॥ धानावदिंद्रःसवनंजुषाणःसखासख्युःशृणवद्वंद

नानिकुविन्मागोपांकरसेजनस्यकुविद्राजानंमघवन्नृजीषिन्॥कुविन्माऋषिंप
पिवांसंसुतस्यकुविन्मेवस्वोअमृतस्यशिक्षाः॥आत्वाबृहंतोहरयोयुजानाअ
र्वागिंद्रसधमादोवहंतु॥प्रयेद्वितादिवऋंजंत्याताः सुसंमृष्टासोवृषभस्यमूराः
॥इंद्रपिबवृषधूतस्यवृष्णआयंतेश्येनउशतेजभार॥यस्यमदेच्यावयसिकृ
ष्टीर्यस्यमदेअपगोत्राववर्थ॥शुनंहुवेम०॥शृण्वंतं०॥७॥अयंतेअस्तु
हर्यतः सोमआहरिभिः सुतः॥जुषाणइंद्रहरिभिर्नआगह्यातिष्ठहरितंरथं॥ह
र्यन्नुषसमर्चयः सूर्यंहर्यन्नरोचयः॥विद्वांश्चिकित्वान्हर्यश्ववर्धसइंद्रविश्वाअ
भिश्रियः॥द्यामिंद्रोहरिधायसंपृथिवींहरिवर्पसं॥अधारयद्धरितोर्भूरिभोज

नंययोरंतर्हरिश्चरत्॥जज्ञानोहरितोवृषाविश्वमाभातिरोचनं॥हर्यश्वोहरि
तंधत्तआयुधमावज्रंबाह्वोर्हरिं॥इंद्रोहर्यंतमर्जुनंवज्रंशुक्रैरभीवृतं॥अपावृ
णोद्धरिभिरद्रिभिःसुतमुद्गाहरिभिराजत॥८॥आमंद्रैरिंद्रहरिभिर्याहिमयूररो
मभिः॥मात्वाकेचिन्नियमन्विंनपाशिनोतिधन्वेवताँइहि॥वृत्रखादोवलंरुजः
पुरांदर्मोअपामजः॥स्थातारथस्यहर्योरभिस्वरइंद्रोदृढाचिदारुजः॥गंभीराँउद
धींरिवक्रतुंपुष्यसिगाइव॥प्रसुगोपायवसंधेनवोयथाह्रदंकुल्याइवाशत॥
आनस्तुजंरयिंभरांशंनप्रतिजानते॥वृक्षंपक्वंफलमंकीवधूनुहींद्रसंपारणंव
सु॥स्वयुरिंद्रस्वराळसिस्मद्दिष्टिःस्वयशस्तरः॥सवावृधानओजसापुरुष्टुतभ

वानःसुश्रवस्तमः॥९॥युध्मस्यतेवृषभस्यस्वराजउग्रस्ययूनःस्थविरस्य
घृष्वेः॥अजूर्यतोवज्रिणोवीर्याणींद्रश्रुतस्यमहतोमहानि॥महाँअसिम
हिषवृष्ण्येभिर्धनस्पृदुग्रसहमानोअन्यान्॥एकोविश्वस्यभुवनस्यराजास
योधयाचक्षययाचजनान्॥प्रमात्राभिरिरिचेरोचमानःप्रदेवेभिर्विश्वतोअप्र
तीतः॥प्रमज्मनादिवइंद्रःपृथिव्याःप्रोरोर्महोअंतरिक्षादृजीषी॥उरुंगभीरंज
नुषाभ्युग्रंविश्वव्यचसमवतंमतीनां॥इंद्रंसोमासःप्रदिविसुतासःसमुद्रंनस्र
वतआविशंति॥यंसोममिंद्रपृथिवीद्यावागर्भंनमाताबिभृतस्त्वाया॥तंतेहिन्वं
तितमुतेमृजंत्यध्वर्यवोवृषभपातवाउ॥१०॥मरुत्वाँइंद्रवृषभोरणायपिबासोम

मनुष्वधंमदाय॥आसिंचस्वजठरेमध्वऊर्मिंत्वंराजासिप्रदिवःसुतानां॥सजो
षाइंद्रसगणोमरुद्भिःसोमंपिबवृत्रहाशूरविद्वान्॥जहिशत्रूँरपमृधोनुदस्वा
थाभयंकृणुहिविश्वतोनः॥उतऋतुभिरृतुपाःपाहिसोममिंद्रदेवेभिःसखिभिः
सुतंनः॥याँआभजोमरुतोयेत्वान्वहन्वृत्रमदधुस्तुभ्यमोजः॥येत्वाहिहत्येमघव
न्नवर्धन्येशांबरेहरिवोयेगविष्टौ॥येत्वानूनमनुमदंतिविप्राःपिबेंद्रसोमंसगणोम
रुद्भिः॥मरुत्वंतंवृषभंवावृधानमकवारिंदिव्यंशासमिंद्रं॥विश्वासाहमवसेनूत
नायोग्रंसहोदामिहतंहुवेम॥११॥सद्योहजातोवृषभःकनीनःप्रभर्तुमावदंधसः
सुतस्य॥साधोःपिबप्रतिकामंयथातेरसाशिरःप्रथमंसोम्यस्य॥यज्जायथास्तद

वानः सुश्रवस्तमः ॥९॥ युध्मस्य ते वृषभस्य स्वराज उग्रस्य यूनः स्थविरस्य
घृष्वेः ॥ अजूर्यतो वज्रिणो वीर्याणींद्र श्रुतस्य महतो महानि ॥ महाँ असि म
हिषवृष्ण्येभिर्धनस्पृदुग्र सहमानो अन्यान् ॥ एको विश्वस्य भुवनस्य राजा स
योधया च क्षयया च जनान् ॥ प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्र
तीतः ॥ प्र मज्मना दिव इंद्रः पृथिव्याः प्रोरोर्महो अंतरिक्षादृजीषी ॥ उरुं गभीरं ज
नुषाभ्युग्रं विश्वव्यचसमवतं मतीनां ॥ इंद्रं सोमासः प्रदिवि सुतासः समुद्रं न स्र
वत आ विशंति ॥ यं सोममिंद्र पृथिवीद्यावा गर्भं न माता बिभृतस्त्वाया ॥ तं ते हिन्वं
ति तमु ते मृजंत्यध्वर्यवो वृषभ पातवा उ ॥१०॥ मरुत्वाँ इंद्र वृषभो रणाय पिबा सोम

२८

मनुष्वधं मदाय ॥ आसिंचस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानां ॥ सजो
षा इंद्र सगणो मरुद्भिः सोमं पिब वृत्रहा शूर विद्वान् ॥ जहि शत्रूँरप मृधो नुदस्वा
थाभयं कृणुहि विश्वतो नः ॥ उत ऋतुभिर्ऋतुपाः पाहि सोममिंद्र देवेभिः सखिभिः
सुतं नः ॥ याँ आभजो मरुतो ये त्वान्वहन्वृत्रमदधुस्तुभ्यमोजः ॥ ये त्वाहिहत्ये मघवं
नवर्धन्ये शांबरे हरिवो ये गविष्टौ ॥ ये त्वा नूनमनुमदंति विप्राः पिबेंद्र सोमं सगणो म
रुद्भिः ॥ मरुत्वंतं वृषभं वावृधानमकवारिं दिव्यं शासमिंद्रं ॥ विश्वासाहमवसे नूत
नायोग्रं सहोदामिह तं हुवेम ॥११॥ सद्यो ह जातो वृषभः कनीनः प्रभर्तुमावदंधसः
सुतस्य ॥ साधोः पिब प्रतिकामं यथा ते रसाशिरः प्रथमं सोम्यस्य ॥ यज्जायथास्तद

हरस्यकामेंऽशोः पीयूषमपिबोगिरिष्ठां॥ तंतेमातापरियोषाजनित्रीमहः पितुर्दम
आसिंचदग्रे॥ उपस्थायमातरमन्नमैट्ट तिग्ममपश्यदभिसोममूधः॥ प्रयावयं
नचरद्गृत्सोअन्यान्महानिचक्रेपुरुधप्रतीकः॥ उग्रस्तुराषाळभिभूत्योजायथा
वशंतन्वंचक्रएषः॥ त्वष्टारमिंद्रोजनुषाभिभूयामुष्यासोममपिबच्चमूषु॥ शुनं
हुवेम०॥ शृण्वंतं॥१२॥ शंसामहामिंद्रंयस्मिन्विश्वाआकृष्टयःसोमपाःकाममव्य
न्॥ यंसुक्रतुंधिषणेविभ्वतष्टंघनंवृत्राणांजनयंतदेवाः॥ यंनुनकिःपृतनासुस्व
राजंद्विताततरतिनृतमंहरिष्ठां॥ इनतमःसत्वभिर्योहशूषैःपृथुज्रयाअमिनादायु
र्दस्योः॥ सहावापृत्सुतरणिर्नार्वाव्यानशीरोदसीमेहनावान्॥ भगोनकारेहव्योम २९

तीनांपितेवचारुःसुहवोवयोधाः॥ धर्तादिवोरजसस्पृष्टऊर्ध्वोरथोनवायुर्वसुभि
र्नियुत्वान्॥ क्षपांवस्ताजनितासूर्यस्यविभक्ताभागंधिषणेववाजं॥ शुनंहुवेम०
शृण्वंतं०॥१२॥ इंद्रःस्वाहापिबतुयस्यसोमआगत्यातुम्रोवृषभोमरुत्वान्॥ ओ
रुव्यचाःपृणतामेभिरन्नैरास्यहविस्तं[illegible]३काममृध्याः॥ आतेसपर्यूजवसेयु
नज्मिययोरनुप्रदिवःश्रुष्टिमावः॥ इहत्वाधेयुर्हरयःसुशिप्रपिबात्व१स्यसुषुत
स्यचारोः॥ गोभिर्मिमिक्षुंदधिरेसुपारमिंद्रंज्यैष्ठ्यायधायसेगृणानाः॥ मंदानःसो
मंपपिवाँऋजीषिन्त्समस्मभ्यंपुरुधागाइषण्य॥ इमंकामंमंदयागोभिरश्वैश्चं
द्रवताराधसापप्रथश्च॥ स्वर्यवोमतिभिस्तुभ्यंविप्राइंद्रायवाहःकुशिकासोअक्रन्॥

शुनंहुवेम॥ शृण्वंतं॥१४॥ चर्षणीधृतंमघवानमुक्थ्य१मिंद्रंगिरोबृहतीरभ्य
नूषत॥ वावृधानंपुरुहूतंसुवृक्तिभिरमर्त्यंजरमाणंदिवेदिवे॥ शतक्रतुमर्णवं
शाकिनंनरंगिरोमइंद्रमुपयंतिविश्वतः॥ वाजसनिंपूर्भिदंतूर्णिमप्तुरंधामसा
चमभिषाचंस्वर्विदं॥ आकरेवसोर्जरितापनस्यतेनेहसःस्तुभइंद्रोदुवस्यति॥
विवस्वतःसदनआहिपिप्रियेसत्रासाहमभिमातिहनंस्तुहि॥ नृणामुत्वान्
तमंगीर्भिरुक्थैरभिप्रवीरमर्चतासबाधः॥ संसहसेपुरुमायोजिहीतेनमोअ
स्यप्रदिवएकईशे॥ पूर्वीरस्यनिःषिधोमर्त्येषुपुरूवसूनिपृथिवीबिभर्ति॥ इंद्रायप
द्यावओषधीरुतापोरयिंरक्षंतिजीरयोवनानि॥१५॥ तुभ्यंब्रह्माणिगिरइंद्रतु ३०

भ्यंसत्रादधिरेहरिवोजुषस्व॥ बोध्या३पिरवसोनूतनस्यसखेवसोजरितृभ्यो
वयोधाः॥ इंद्रमरुत्वइहपाहिसोमंयथाशार्यातेअपिबःसुतस्य॥ तवप्रणीती
तवप्रणीतीतवशूरशर्मन्नाविवासंतिकवयःसुयज्ञाः॥ सवावशानइहपाहिसो
मंमरुद्भिरिंद्रसखिभिःसुतंनः॥ जातंयत्त्वापरिदेवाअभूषन्महेभरायपुरुहूत
विश्वे॥ अप्तूर्येमरुतआपिरेषोमंदन्निंद्रमनुदातिवाराः॥ तेभिःसाकंपिबवृत्र
खादःसुतंसोमंदाशुषःस्वेसधस्थे॥ इदंह्यन्वोजसासुतंराधानांपते॥ पिबात्वा
१स्यगिर्वणः॥ यस्तेअनुस्वधामसत्सुतेनियच्छतन्वं॥ सत्वाममत्तुसोम्यं॥ प्रते
अश्नोतुकुक्ष्योःप्रेंद्रब्रह्मणाशिरःप्रबाहूशूरराधसे॥१६॥ धानावंतंकरंभिणम

पूपवंतमुक्थिनं ॥ इंद्र प्रातर्जुषस्व नः ॥ पुरोळाशं पचत्यं जुषस्वेंद्रा गुरस्व च ॥ तुभ्यं
हव्यानि सिस्रते ॥ पुरोळाशं च नो घसो जोषयासे गिरश्च नः ॥ वधूयुरिव योषणां
॥ पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः ॥ इंद्र क्रतुर्हि ते बृहन् ॥ माध्यंदिनस्य
सवनस्य धानाः पुरोळाशमिंद्र कृष्वेह चारुं ॥ प्र यत्स्तोता जरिता तूर्ण्यर्थो वृषाय
माण उप गीर्भिरीट्टे ॥ १७ ॥ तृतीये धानाः सवने पुरुष्टुत पुरोळाशमाहुतं मामह
स्व नः ॥ ऋभुमंतं वाजवंतं त्वा कवे प्रयस्वंत उप शिक्षेम धीतिभिः ॥ पूषण्वते ते च
कृमा करंभं हरिवते हर्यश्वाय धानाः ॥ अपूपमद्धि सगणो मरुद्भिः सोमं पिब वृत्र
हा शूर विद्वान् ॥ प्रति धाना भरत तूयमस्मै पुरोळाशं वीरतमाय नृणां ॥ दिवेदिवे ३३

सदृशीरिंद्र तुभ्यं वर्धंतु त्वा सोमपेयाय धृष्णो ॥ १८ ॥ इंद्रापर्वता बृहता रथेन वा
मीरिष आ वहतं सुवीराः ॥ वीतं हव्यान्यध्वरेषु देवा वर्धेथां गीर्भिरिळया मदंता ॥
तिष्ठा सु कं मघवन्मा परा गाः सोमस्य नु त्वा सुषुतस्य यक्षि ॥ पितुर्न पुत्रः सिच
मा रभे त इंद्र स्वादिष्ठया गिरा शचीवः ॥ शंसावाध्वर्यो प्रति मे गृणीहींद्राय वाहः कृ
णवाव जुष्टं ॥ एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिंद्राय शस्तं ॥ जायेदस्तं
मघवन्त्सेदु योनिस्तदित्त्वा युक्ता हरयो वहंतु ॥ यदा कदा च सुनवाम सोममग्नि
ष्ट्वा दूतो धन्वात्यच्छ ॥ परा याहि मघवन्ना च याहींद्र भ्रातरुभयत्रा ते अर्थं ॥ यत्रा
रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य ॥ १९ ॥ अपाः सोममस्तमिं

ष्प्र याहि कल्याणीर्जाया सुरणं गृहे ते ।। यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ।। इमे भोजा अंगिरसो विरूपा दिवस्पुत्रासो असुरस्य वीराः ।। विश्वामित्राय ददतो मघानि सहस्रसावे प्र तिरंत आयुः ।। रूपंरूपं मघवा बोभवीति मायाः कृण्वानस्तन्वं१ परि स्वां ।। त्रिर्यद्दिवः परि मुहूर्तमागात्स्वैर्मंत्रैरनृतुपा ऋतावा ।। महाँ ऋषिर्देवजा देवजूतोऽस्तभ्नात्सिंधुमर्णवं नृचक्षाः ।। विश्वामित्रो यदवहत्सुदासमप्रियायत कुशिकेभिरिंद्रः ।। हंसाइव कृणुथ श्लोकमद्रिभिर्मदंतो गीर्भिरध्वरे सुते सचा ।। देवेभिर्विप्रा ऋषयो नृचक्षसो वि पिबध्वं कुशिकाः सोम्यं मधु ।। २० ।। उप प्रेत कुशिकाश्चेतयध्वमश्वं राये प्र मुंचता सुदासः ।। राजा

३२

वृत्रं जंघनत्प्रागपागुदगथा यजाते वर आ पृथिव्याः ।। य इमे रोदसी उभे अहमिंद्रमतुष्टवं ।। विश्वामित्रस्य रक्षति ब्रह्मेदं भारतं जनं ।। विश्वामित्रा अरासत ब्रह्मेंद्राय वज्रिणे ।। करदिन्नः सुराधसः ।। किं ते कृण्वंति कीकटेषु गावो नाशिरं दुह्रे न तपंति घर्मं ।। आ नो भर प्रमगंदस्य वेदो नैचाशाखं मघवन्रंधया नः ।। ससर्परीरमतिं बाधमाना बृहन्मिमाय जमदग्निदत्ता ।। आ सूर्यस्य दुहिता ततान श्रवो देवेष्वमृतमजुर्यं ।। २१ ।। ससर्परीरभरत्तूयमेभ्योऽधि श्रवः पांचजन्यासु कृष्टिषु ।। सा पक्ष्या३ नव्यमायुर्दधाना यां मे पलस्तिजमदग्नयो ददुः ।। स्थिरौ गावौ भवतां वीळुरक्षो मेषा वि वर्हि मा युगं वि शारि ।। इंद्रः पातल्ये ददतां शरीतोररिष्टनेमे अभि

भिनः सच्चस्व॥ बलंधेहितनूषुणो बलमिंद्रानलुत्सुनः॥ बलंतोकायतनयाय
जीवसेत्वंहिबलदाअसि॥ अभिव्ययस्वखदिरस्यसारमोजोधेहिस्पंदनेशिं
शपायां॥ अक्षवीलोवीलितवीलयस्वमायामादस्मादवजीहिपोनः॥ अयम
स्मान्वनस्पतिर्माचहामाचरीरिषत्॥ स्वस्त्यागृहेभ्यआवसाआविमोचनात्॥
॥२२॥ इंद्रोतिभिर्बहुलाभिर्नोअद्ययाच्छ्रेष्ठाभिर्मघवंछूरजिन्व॥ योनोद्वेष्ट्य
धरःसस्पदीष्टयमुद्विष्मस्तमुप्राणोजहातु॥ परशुंचिद्वितपतिशिंबलंचिद्वि
वृश्चति॥ उखाचिदिंद्रयेषंतीप्रयस्ताफेनमस्यति॥ नसायकस्यचिकितेजना
सोलोधंनयंतिपशुमन्यमानाः॥ नावाजिनंवाजिनाहासयंतिनगर्दभंपुरोअश्वा

३३

नयंति॥ इमइंद्रभरतस्यपुत्राअपपित्वंचिकितुर्नप्रपित्वं॥ हिन्वंत्यश्वमरणं
ननित्यंज्यावाजंपरिणयंत्याजौ॥२३॥ इमंमहेविदथ्यायशूषंशश्वत्कृत्वईड्या
यप्रजभ्रुः॥ शृणोतुनोदम्येभिरनीकैःशृणोत्वग्निर्दिव्यैरजस्रः॥ महिमहेदि
वेअर्चापृथिव्यैकामोमइच्छंचरतिप्रजानन्॥ ययोर्हस्तोमेविदथेषुदेवाःस
पर्यवोमादयंतेसचायोः॥ युवोर्ऋतंरोदसीसत्यमस्तुमहेषुणःसुवितायप्र
भूतं॥ इदंदिवेनमोअग्नेपृथिव्यैसपर्यामिप्रयसायामिरत्नं॥ उतोहिवांपूर्व्या
आविविद्रऋतावरीरोदसीसत्यवाचः॥ नरश्चिद्वांसमिथेशूरसातौववंदिरे
पृथिविवेविदानाः॥ कोअद्धावेदकइहप्रवोचद्देवाँअच्छापथ्याकासमेति॥ दद

ऋएषामवमासदं सिपरेषु यएं हेषुव्रतेषु ॥ २४ ॥ कविर्नृचक्षा अभिषीम
चष्टनृतस्ययो नाविघृत्ते मदंती ॥ नाना चक्राते सदनं यथावेः समानेनक्र
तुनासंविदाने ॥ समान्याविपुत्ते दूरे अंते ध्रुवे पदे तस्थतुर्जागरूके ॥ उतस्व
सारायुवती भवंती आदु ब्रुवाते मिथुनानि नाम ॥ विश्वेदेते जनिमासंविवि
क्तोमहोदेवान्बिभ्रती नव्यथेते ॥ एजध्रुवंपसते विश्वमेकं चरत्पतत्रि विषुणं
विजातं ॥ सनापुराणमध्येम्यारान्महः पितुर्जनितुर्जामितन्नः ॥ देवासो यत्र
पनितार एवैरुरौपथिव्युते तस्थुरंतः ॥ इमंस्तोमंरोदसीप्रब्रवीम्यृदूदराः शृण
वं नग्निजिह्वाः ॥ मित्रः संम्राजो वरुणोयुवान आदित्यासः कवयः पप्रथानाः ॥ २५ ॥

हिरण्यपाणिः सविता सुजिह्वस्त्रिरा दिवोविदथेपत्यमानः ॥ देवेषुचसवितः
श्लोकमश्रेरादस्मभ्यमासुवसर्वतातिं ॥ सुकृत्सुपाणिः स्ववाँऋतावा देवस्त्व
ष्टावसे तानि नोधात् ॥ पूषण्वंत ऋभवो मादयध्वमूर्ध्वग्रावाणो अध्वरमत
ष्ट ॥ विद्युद्रथा मरुत ऋष्टिमंतो दिवो मर्या ऋतजाता अयासः ॥ सरस्वतीशृ
णवन्यज्ञियासो धातारयिं सहवीरं तुरासः ॥ विष्णुंस्तोमासः पुरुदस्ममर्का
भगस्येवकारिणोयामनिग्मन् ॥ उरुक्रमः ककुहोयस्यपूर्वीर्नमर्धंतियुवत
योजनित्रीः ॥ इंद्रोविश्वैर्वीर्यैः पत्यमान उभे आपप्रौ रोदसीमहित्वा ॥ पुरंदरो
वृत्रहाधृष्णुषेणः संगृभ्यान आभराभूरिपश्वः ॥ २६ ॥ नासत्यामेपितरावंधु

पृक्षासजातसमश्विनोश्चारुनाम॥युवंहिस्थोरयिदौनोरयीणांदात्रंरक्षेथेअ
कवैरदब्धं॥महत्तद्वःकवयश्चारुनामयद्धदेवाभवथविश्वइंद्रे॥सखऋभुभिः
पुरुहुतप्रियेभिरिमांधियंसातयेतक्षतानः॥अर्यमाणोअदितिर्यज्ञियासो
दब्धानिवरुणस्यव्रतानि॥युयोततनोनपत्यानिगंतोःप्रजावानःपशुमाँअस्तु
गातु॥देवानांदूतःपुरुधप्रसूतोनागान्नोवोचतुसर्वतातः॥शृणोतुनःपृथिवी
द्यौरुतापःसूर्योनक्षत्रैरुर्वंतरिक्षं॥शृण्वंतुनोवृषणःपर्वतासोध्रुवक्षेमास
इळयामदंतः॥आदित्यैर्नोअदितिःशृणोतुयच्छंतुनोमरुतःशर्मभद्रं॥सदासु
गःपितुमाँअस्तुपंथामध्वादेवाओषधीःसंपिपृक्त॥भगोमेअग्नेसख्येनमृध्या

उद्रायोअश्यांसदनंपुरुक्षोः॥स्वदस्वहव्यासमिषोदिदीह्यस्मद्र्य१क्संमिमी
हिश्रवांसि॥विश्वाअग्नेपृत्सुताञ्जेषिशत्रूनहाविश्वासुमनादीदिहीनः॥२७॥
उषसःपूर्वाअधयद्व्यूषुर्महद्विजज्ञेअक्षरंपदेगोः॥व्रतादेवानामुपनुप्रभूष
न्महद्देवानामसुरत्वमेकं॥मोषूणोअत्रजुहुरंतदेवामापूर्वेअग्नेपितरःपदज्ञाः
॥पुराण्योःसद्मनोःकेतुरंतर्महद्देवानामसुरत्वमेकं॥विमेपुरुत्रापततिका
माःशम्यच्छादीदेपूर्व्याणि॥समिद्धेअग्नावृतमिद्वदेममहद्देवानां॥समानो
राजाविभृतःपुरुत्राशयेशयासुप्रयुतोवनानु॥अन्यावत्संभरतिक्षेतिमा
तामहद्देवानां॥आक्षित्पूर्वास्वपराअनूरुत्सद्योजातासुतरुणीष्वंतः॥अंत

वर्त्तीःसुवतेअप्रवीतामहद्देवान॰॥२८॥शयुःपरस्तादधनुद्विमाताबंधन
श्चरतिवत्सएकः॥मित्रस्यतावरुणस्यव्रतानिमहद्देवा॰॥द्विमाताहोतावि
दथेषुसम्राळन्वग्रंचरतिक्षेतिबुध्नः॥प्ररण्यानिरण्यवाचोभरंतेमहद्देवा
ना॰॥शूरस्येवयुध्यतोअंतमस्यप्रतीचीनंददृशेविश्वमायत्॥अंतर्मतिः
श्चरतिनिःषिधंगोर्महद्देवा॰॥निवेवेतिपलितोदूतआस्वंतर्महांश्चरतिरोच
नेन॥वपूंषिबिभ्रदभिनोविचष्टेमहद्देवा॰॥विष्णुर्गोपाःपरमंपातिपाथःप्रि
याधामान्यमृतादधानः॥अग्निष्टाविश्वाभुवनानिवेदमहद्देवा॰॥२९॥नाना
चक्रातेयम्या३वपूंषितयोरन्यद्रोचतेकृष्णमन्यत्॥श्यावीचयदरुषीचस्वसा

रौमहद्देवाना॰॥मातीचयत्रदुहिताचधेनूसबर्दुघेधापयेतेसमीची॥ऋत
स्यतेसदसीळेअंतर्महद्देवाना॰॥अन्यस्यावत्संरिहतीमिमायकयाभुवा
निदधेधेनुरूधः॥ऋतस्यसापयसापिन्वतेळामहद्देवानामसुरत्वमेकं॥प
द्यावस्तेपुरुरूपावपूंष्यूर्ध्वातस्थौत्र्यविंरेरिहाणा॥ऋतस्यसद्मविचरामिवि
द्वान्महद्देवा॰॥पदेइवनिहितेदस्मेअंतस्तयोरन्यद्गुह्यमाविरन्यत्॥सध्रीची
नापथ्या३साविषूचीमहद्देवा॰॥३०॥आधेनवोधुनयंतामशिश्वीःसबर्दुघाः
शशयाअप्रदुग्धाः॥नव्यानव्यायुवतयोभवंतीर्महद्देवानामसुरत्वमेकं॥
यदन्यासुवृषभोरोरवीतिसोअन्यस्मिन्यूथेनिदधातिरेतः॥सहिक्षपावान्स

भगः सराजामहद्देवानां ॥ वीरस्यनुस्वश्व्यंजनासः प्रनुवोचामविदुरस्यदेवाः
॥षोळ्हायुक्ताः पंचपंचावहंतिमहद्देवानाम् ॥ देवस्त्वष्टासविताविश्वरूपः
पुपोषप्रजाः पुरुधाजजान ॥ इमाचविश्वाभुवनान्यस्यमहद्देवा० ॥ महीसमैर
च्चम्वासमीचीउभेतेअस्यवसुनान्यृष्टे ॥ शृण्वेवीरोविंदमानोवसूनिमहद्देवा०
॥ इमांचनः पृथिवींविश्वधायाउपक्षेतिहितमित्रोनराजा ॥ पुरः सदः शर्म
सदोनवीरामहद्देवानां ॥ निःषिध्वरीस्तओषधीरुतापोरयिंतइंद्रपृथिवीबि
भर्ति ॥ सखायस्तेवामभाजस्याममहद्देवानामसुरत्वमेकं ॥२२॥ ५ ॥ इतिश्रीतृ
तीयाष्टकेतृतीयोध्यायः ॥ ३ ॥ हरिः ॐ ॥ नतामिनंतिमायिनोनधीराव्रतादेवा ३८

नांप्रथमाध्रुवाणि ॥ नरोदसीअद्रुहावेद्याभिर्नपर्वतानिनमेतस्थिवांसः ॥ षड
भारँएकोअचरंबिभर्त्यृतंवर्षिष्ठमुपगावआगुः ॥ तिस्रोमहीरुपरास्तस्थुरत्या
गुहाद्वेनिहितेदर्श्येका ॥ त्रिपाजस्योवृषभोविश्वरूपउतत्र्युधापुरुधप्रजावान् ॥
त्र्यनीकः पत्यतेमाहिनावान्त्सरेतोधावृषभः शश्वतीनां ॥ अभीकआसांपदवी
रबोध्यादित्यानामह्वेचारुनाम ॥ आपश्चिदस्माअरमंतदेवीः पृथग्व्रजंतीः
परिषीमवृंजन् ॥ त्रीषधस्थासिंधवस्त्रिः कवीनामुतत्रिमाताविदथेषुसम्राट् ॥
ऋतावरीर्योषणास्तिस्रोअप्यास्त्रिरादिवोविदथेपत्यमानाः ॥ त्रिरादिवः सवितर्वा
र्याणिदिवेदिवआसुवत्रिर्नोअह्नः ॥ त्रिधातुरायआसुवावसूनिभगत्रातर्धिष

पोसात्तयेधाः॥ त्रिरादिवःसवितासोषवीतिराजानामित्रावरुणासुपाणी॥ आ
पश्चिदस्यरोदसीचिदुर्वीरत्नंभिक्षंतसवितुःसवाय॥ त्रिरुत्तमादूणशारोचना
नित्रयोराजंत्यसुरस्यवीराः॥ ऋतावानइषिरादूळभासस्त्रिरादिवोविदथेसंतु
देवाः॥१॥ प्रमेविविक्वाँअविदन्मनीषांधेनुंचरंतींप्रयुतामगोपां॥ सद्यश्चिद्या
दुदुहेभूरिधासेरिंद्रस्तदग्निःपनितारोअस्याः॥ इंद्रःसुपूषावृषणासुहस्तादिवो
नप्रीताःशशयंदुदुह्रे॥ विश्वेयदस्यांरणयंतदेवाःप्रवोऽत्रवसवःसुम्नमश्यां॥
याजामयोवृष्णइच्छंतिशक्तिंनमस्यंतीर्जानतेगर्भमस्मिन्॥ अच्छापुत्रंधेनवो
वावशानामहश्चरंतिबिभ्रतंवपूंषि॥ अच्छाविवक्मिरोदसीसुमेकेग्राव्णोयुजा

३८

नोअध्वरेमनीषां॥ इमाउतेमनवेभूरिवाराऊर्ध्वाभवंतिदर्शतायजत्राः॥
यातेजिह्वामधुमतीसुमेधाअग्नेदेवेषूच्यतउरूची॥ तयेहविश्वाँअवसेय
जत्रानासादयपाययाचामधूनि॥ यातेअग्नेपर्वतस्येवधारासश्चंतीपीप
यद्देवचित्रा॥ तामस्मभ्यंप्रमतिंजातवेदोवसोरास्वसुमतिंविश्वजन्यां॥२॥
धेनुःप्रत्नस्यकाम्यंदुहानांतःपुत्रश्चरतिदक्षिणायाः॥ आद्योतनिंवहतिशुभ्र
यामोषसःस्तोमोअश्विनावजीगः॥ सुयुग्वहंतिप्रतिवामृतेनोर्ध्वाभवंतिपित
रेवमेधाः॥ जरेथामस्मद्विपणेर्मनीषांयुवोरवश्चकृमायातमर्वाक्॥ सुयुग्भिरश्वैः
सुवृतारथेनदस्राविमंशृणुतंश्लोकमद्रेः॥ किमंगवांप्रत्यवर्तिंगमिष्ठाहुर्विप्रासो

अश्विना पुराजाः॥ आ मन्येथामा गतं कच्चिदेवैर्विश्वे जनासो अश्विना हवंते
॥ इमा हि वां गोऋजीका मधूनि प्र मित्रासो न ददुरुस्रो अग्रे॥ तिरः पुरू चिदश्वि
ना रजांस्यांगूषो वां मघवाना जनेषु॥ एह यातं पथिभिर्देवयानैर्दस्राविमे वां नि
धयो मधूनां॥ ३॥ पुराणमोकः सख्यं शिवं वां युवोर्नरा द्रविणं जह्नाव्यां॥ पुनः कृ
ण्वानाः सख्या शिवानि मध्वा मदेम सह नू समानाः॥ अश्विना वायुना युवं सुद
क्षा नियुद्भिश्च सजोषसा युवाना॥ नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतमस्रि
धा सुदानू॥ अश्विना परि वामिषः पुरूचीरीयुर्गीर्भिर्यतमाना अमृध्राः॥ रथो ह
वामृतजा अद्रिजूतः परि द्यावापृथिवी याति सद्यः॥ अश्विना मधुषुत्तमो युवाकुः ॥३९॥

सोमस्तं पातमा गतं दुरोणे॥ रथो ह वां भूरि वर्पः करिक्रत्सुतावतो निष्कृतमा ग
मिष्ठः॥ ५॥ मित्रो जनान्यातयति ब्रुवाणो मित्रो दाधार पृथिवीमुत द्यां॥ मित्रः
कृष्टीरनिमिषाभि चष्टे मित्राय हव्यं घृतवज्जुहोत॥ प्र स मित्र मर्तो अस्तु प्रय
स्वान्यस्त आदित्य शिक्षति व्रतेन॥ न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यंति
तो न दूरात्॥ अनमीवास इळया मदंतो मितज्ञवो वरिमन्ना पृथिव्याः॥ आदित्यस्य
व्रतमुपक्षियंतो वयं मित्रस्य सुमतौ स्याम॥ अयं मित्रो नमस्यः सुशेवो राजा सु
क्षत्रो अजनिष्ट वेधाः॥ तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम॥ महाँ
आदित्यो नमसोपसद्यो यातयज्जनो गृणते सुशेवः॥ तस्मा एतत्पन्यतमाय जुष्ट

मग्नौमित्रायहविराजुहोत ॥५॥ मित्रस्यचर्षणीधृतोवोदेवस्यसानसि । द्युम्नं
चित्रश्रवस्तमं ॥ अभियोमहिनादिवंमित्रोबभूवसप्रथाः ॥ अभिश्रवोभिःपृथि
वीं ॥ मित्रायपंचयेमिरेजना अभिष्टिशवसे ॥ सदेवान्विश्वान्बिभर्त्ति ॥ मित्रोदे
वेष्वायुषुजनायवृक्तबर्हिषे ॥ इषइष्टव्रता अकः ॥ ६ ॥ इहेहवोमनसाबंधुतानर
उशिजोजग्मुरभितानिवेदसा ॥ याभिर्मायाभिःप्रतिजूतिवर्पसःसौधन्वनायज्ञि
यंभागमानश ॥ याभिःशचीभिश्चमसाँअपिंशतयाधियागामरिणीतचर्मणः
॥ येनहरीमनसानिरतक्षततेनदेवत्वमृभवःसमानश ॥ इंद्रस्यसख्यमृभवःसमा
नशुर्मनोर्नपातो अपसोदधन्विरे ॥ सौधन्वनासोअमृतत्वमेरिरेविष्ट्वीशमीभिः

५०

सुकृतःसुकृत्यया ॥ इंद्रेणयाथसरथंसुतेसचाँ अथोवशानांभवथासहश्रिया ॥
नवःप्रतिमैसुकृतानिवाघतःसौधन्वनाऋभवोवीर्याणिच ॥ इंद्रऋभुभिर्वाज
वद्भिःसमुक्षितंसुतंसोममावृषस्वागभस्त्योः ॥ धियेषितोमघवंदाशुषोगृहेसौ
धन्वनेभिःसहमत्स्वानृभिः ॥ इंद्रऋभुमान्वाजवान्मत्स्वेहनोस्मिंत्सवनेशच्यापुरु
ष्टुत ॥ इमानितुभ्यंस्वसराणियेमिरेव्रतादेवानांमनुषश्चधर्मभिः ॥ इंद्रऋभुभिर्वा
जिभिर्वाजयन्निहस्तोमंजरितुरुपयाहियज्ञियं ॥ शतंकेतेभिरिषिरेभिरायवेस
हस्रणीथो अध्वरस्यहोमनि ॥ ७ ॥ उषोवाजेनवाजिनिप्रचेताःस्तोमंजुषस्वगृण
तोमघोनि ॥ पुराणीदेवियुवतिःपुरंधिरनुव्रतंचरसिविश्ववारे ॥ उषोदेव्यमर्त्या

विभाहिदेवद्रथासूनृताईरयंती॥आत्वावहंतुसुयमासोअश्वाहिरंण्यवर्णांपृथु
पाजसोये॥उषः प्रतीचीभुवनानिविश्वोर्ध्वातिष्ठःस्यमृतस्यकेतुः॥समानम
र्थंचरणीयमानाचक्रमिवनव्यस्यावत्स्व॥अवस्युमेववितन्वतीमघोनुषाय
तिस्वसरस्यपत्नी॥स्वा१र्जनंतीसुभगासुदंसाआंतादिवःपप्रथआपृथिव्याः॥
अछावोदेवीमुषसंविभातींप्रवोभरध्वंनमसासुवृक्तिं॥ऊर्ध्वंमधुधादिविपाजो
अश्रेत्प्ररोचनारुरुचेरण्वसंदृक्॥ऋतावरीदिवोअर्कैरबोध्यारेवतीरोदसी
चित्रमस्थात्॥आयतीमग्नउषसंविभातींवाममेषिद्रविणंभिक्षमाणः॥ऋतस्य
बुध्नउषसामिषण्यन्वृषामहीरोदसीआविवेश॥महीमित्रस्यवरुणस्यमायाचं

४१

द्रेवभानुंविदधेपुरुत्रा॥२॥इमाउवांभृमयोमन्यमानायुवावतेनतुज्याअभूवन्॥
क्वा१त्यदिंद्रावरुणायशोवांयेनस्मासिनंभरथःसखिभ्यः॥अयमुवांपुरुतमोर
यीयंछश्वत्तममवसेजोहवीति॥सजोषाविंद्रावरुणामरुद्भिर्दिवापृथिव्याशृणु
तंहवंमे॥अस्मेतदिंद्रावरुणावसुष्यादस्मेरयिर्मरुतःसर्ववीरः॥अस्मान्वरू
त्रीःशरणैरवंत्वस्मान्होत्राभारतीदक्षिणाभिः॥बृहस्पतेजुषस्वनोहव्यानिविश्व
देव्य॥रास्वरत्नानिदाशुषे॥शुचिमर्कैर्बृहस्पतिमध्वरेषुनमस्यत॥अनाम्योजआ
चके॥२॥वृषभंचर्षणीनांविश्वरूपमदाभ्यं॥बृहस्पतिंवरेण्यं॥इयंतेपूषन्नाघृ
णेसुष्टुतिर्देवनव्यसी॥अस्माभिस्तुभ्यंशस्यते॥तांजुषस्वगिरंममवाजयंतीम

वाधियं॥ वधुयुरिव योषणां॥ यो विश्वाभिविपश्यति भुवनासंचपश्यति॥ सनः
पूषाविता भुवतु॥ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोनः प्रचोदयात्॥
॥१०॥ देवस्य सवितुर्वयं वाजयंतः पुरंध्या॥ भगस्य रातिमीमहे॥ देवंनरः सविता
रं विप्रायज्ञैः सुवृक्तिभिः॥ नमस्यंतिधियेषिताः॥ सोमोजिगातिगातुविद्देवाना
मेतिनिष्कृतं॥ ऋतस्य योनिमासदं॥ सोमो अस्मभ्यंद्विपदे चतुष्पदे चपशवे॥
अनमीवाइषस्करत्॥ अस्माकमायुर्वर्धयन्नभिमातीः सहमानः॥ सोमः सध
स्थमासदत्॥ आनो मित्रावरुणाघृतैर्गव्यूतिमुक्षतं॥ मध्वारजांसिसुक्रतु॥ उरु
शंसानमो वृधामन्हादक्षस्य राजथः॥ द्राघिष्ठाभिः शुचिव्रता॥ गृणानाजमदग्नि

५२

नायोनावृतस्य सीदतं॥ पातंसोममृतावृधा॥ ११॥ गृणानाजमदग्निनाजमदग्नि
र्मित्रावरुणौ गायत्री॥ जदमेग्नि ऋषिः॥ मित्रावरुणौदेवते गायत्रीछंदः॥ त्वांह्य
ग्नेवामदेवोग्निरुष्टी॥ वामदेव ऋषिः॥ अग्निर्देवता अष्टीछंदः॥ विश्वेश्वरविन्न
पाक्षं॥ त्वांह्यग्नेसदमित्समन्यवो देवासोदेवमरतिंन्येरिरइतिक्रत्वान्येरिरे॥ अ
मर्त्यंयजतमर्त्येष्वादेवमादेवंजनतप्रचेतसं विश्वमादेवंजनतप्रचेतसं॥ सभ्रात
रं वरुणमग्न आववृत्स्व देवाँ अच्छासुमती यज्ञवनसंज्येष्ठंयज्ञवनसं॥ ऋतावान
मादित्यंचर्षणीधृतंराजानं चर्षणीधृतं॥ सखेसखायमभ्याववृत्स्वाशुंनचक्रंरथ्ये
वरंह्यास्मभ्यंदस्मरंह्या॥ अग्नेमृळीकंवरुणेसचाविदोमरुत्सुविश्वभानुषु॥ तोका

यत्तुजेतुशुचानशरुध्यस्मभ्यंदस्मशंकृधि॥ त्वंनोअग्नेवरुणस्यविद्वान्देवस्यहे
ळोवयासिसीष्ठाः॥ यजिष्ठोवह्नितमः शोशुचानोविश्वाद्वेषांसिप्रमुमुग्ध्यस्मत्
॥सत्वंनोअग्नेवमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौ॥ अवयक्ष्वनोवरुणंरराणो
वीहिमृळीकंसुहवोनएधि॥१२॥ अस्यश्रेष्ठासुभगस्यसंदृग्देवस्यचित्रतमाम
र्त्येषु॥ शुचिघृतंनतप्तमघ्न्यायाः स्पार्हादेवस्यमंहनेवधेनोः॥ त्रिरस्यतापरमा
सन्तिसत्यास्पार्हादेवस्यजनिमान्यग्नेः॥ अनंतेअंतः परिवीतआगाच्छुचिः शुक्रो
अर्योरोरुचानः॥ सदूतोविश्वेदभिवष्टिसद्माहोताहिरण्यरथोरंसुजिह्वः॥ रोहि
दश्वोवपुष्योविभावासदारण्वः पितुमतीवसंसत्॥ सचेतयंमनुषोयज्ञबंधुः प्र ४२

तंमह्यारशनयानयंति॥ सक्षेत्यस्यदुर्यासुसाधन्देवोमर्तस्यसधनित्वमापा॥सतू
नोअग्निर्नयतुप्रजानन्नच्छारत्नंदेवभक्तंयदस्य॥ धियायद्विश्वेअमृताअकृण्वं
द्यौष्पिताजनितासत्यमुक्षन्॥१२॥ सजायतप्रथमः पस्त्यासुमहोबुध्नेरजसो
अस्ययोनौ॥ अपादशीर्षागुहमानोअंतायोयुवानोवृषभस्यनीळे॥ प्रशर्धआ
र्तप्रथमंविपन्यांऋतस्ययोनावृषभस्यनीळे॥ स्पार्होयुवावपुष्योविभावासप्त
प्रियासोजनयंतवृष्णे॥ अस्माकमत्रपितरोमनुष्याअभिप्रसेदुर्ऋतमाशुषाणाः
॥अश्मव्रजाः सुदुघावव्रेअंतरुदुस्राआजन्नुषसोहुवानाः॥ तेमर्मृजतदद्वांस
सोअद्रिंतदेषामन्येअभितोविवोचन्॥ पश्वयंत्रासोअभिकारमर्चन्विदंतज्योति

चक्रपंत धीभिः॥ ते गव्यता मनसा दृध्रमुब्धं गा येमानं परि षंतमद्रिं॥ दृळ्हं नरो वच
सा दैव्येन व्रजं गोमंतमुशिजो वि वव्रुः॥१४॥ ते मन्वत प्रथमं नाम धेनोस्त्रिः सप्त मा
तुः परमाणि विंदन्॥ तज्जानतीरभ्यनूषत व्राः आविर्भुवदरुणीर्यशसा गोः॥
नेशत्तमो दुधितं रोचत द्यौरुद्देव्या उषसो भानुरर्त॥ आ सूर्यो बृहतस्तिष्ठदज्रां ऋ
जु मर्तेषु वृजिना च पश्यन्॥ आदित्पश्चा बुबुधाना व्यख्यन्नादिद्रत्नं धारयंत द्युभ
क्तं॥ विश्वे विश्वासु दुर्यासु देवा मित्र धियो वरुण सत्यमस्तु॥ अच्छा वोचेय शुशुचान
मग्निं होतारं विश्वभरसं यजिष्ठं॥ शुच्यूधो अतृणन्न गवामंधो न पूतं परिषिक्तमंशोः
॥ विश्वेषा॥मदितिर्यज्ञियानां विश्वेषामतिथिर्मानुषाणां॥ अग्निर्देवानामव आव

५८

णानः सुमृळीको भवतु जातवेदाः॥१५॥ यो मर्त्येष्वमृत ऋतावा देवो देवेष्वरतिर्नि
धायि॥ होता यजिष्ठो मह्ना शुचध्यै हव्यैरग्निर्मनुष ईरयध्यै॥ इह त्वं सूनो सहसो नो
अद्य जातो जाताँ उभयाँ अंतरग्ने॥ दूत ईयसे युयुजान ऋष्व ऋजुमुष्कान्वृषणः
शुक्रांश्च॥ अत्या वृधस्नू रोहिता घृतस्नू ऋतस्य मन्ये मनसा जविष्ठा॥ अंतरीय
से अरुषा युजानो युष्मांश्च देवान्विश आ च मर्तान्॥ अर्यमणं वरुणं मित्रमेषामिं
द्राविष्णू मरुतो अश्विनोत॥ स्वश्वो अग्ने सुरथः सुराधा एदु वह सुहविषे जनाय॥
गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा सदमिदप्रमृष्यः॥ इळावाँ एषो असुर प्रजा
वान्दीर्घो रयिः पृथुबुध्नः सभावान्॥१६॥ यस्त इध्मं जभरत्सिष्विदानो मूर्धानं वा तत

पते त्वाया ।। भुवस्तस्य स्वतवाँ पायुरग्ने विश्वस्मात्सीमघायत उरुष्य ।। यस्ते भरा
दन्नियते चिदन्नं निशिषन्मन्द्रमतिथिमुदीरत् ।। आ देवयुरिनधते दुरोणे तस्मिन्र
यिर्ध्रुवो अस्तु दास्वान् ।। यस्त्वा दोषा य उषसि प्रशंसात्प्रियं वा त्वा कृणवते हविष्मा
न् ।। अश्वो न स्वे दम आ हेम्यावान्तमंहसः पीपरो दाश्वांसं ।। यस्तुभ्यमग्ने अमृता
य दाशद्दुवस्त्वे कृणवते यतस्रुक् ।। न स राया शशमानो वि योषन्नैनमंहः परि वरद
घायोः ।। यस्य त्वमग्ने अध्वरं जुजोषो देवो मर्तस्य सुधितं रराणः ।। प्रीतेदसद्धोत्रा सा
यविष्ठासाम यस्य विधतो वृधासः ।।१०।। चित्तिमचित्तिं चिनवद्वि विद्वान्पृष्ठेव वीता
वृजिना च मर्तान् ।। राये च नः स्वपत्याय देव दितिं च रास्वादितिमुरुष्य ।। कविं शशासुः

५५

कवयोऽदब्धा निधारयन्तो दुर्यास्वायोः ।। अतस्त्वं दृश्याँ अग्न एतान्पड्भिः पश्येरद्भुताँ
अर्य एवैः ।। त्वमग्ने वाघते सुप्रणीतिः सुतसोमाय विधते यविष्ठ ।। रत्नं भर शशमा
नाय घृष्वे पृथु श्चन्द्रमवसे चर्षणिप्राः ।। अधा ह यद्वयमग्ने त्वाया पड्भिर्हस्तेभिश्च
कृमा तनूभिः ।। रथं न क्रन्तो अपसा भुरिजोरृतं येमुः सुध्य आशुषाणाः ।। अधा मा
तुरुषसः सप्त विप्रा जायेमहि प्रथमा वेधसो नॄन् ।। दिवस्पुत्रा अङ्गिरसो भवेमाद्रिं
रुजेम धनिनं शुचन्तः ।।११।। अधा यथा नः पितरः परासः प्रत्नासो अग्न ऋतमाशु
षाणाः ।। शुचीदयन्दीधितिमुक्थशासः क्षामा भिन्दन्तो अरुणीरप व्रन् ।। सुकर्माणः
सुरुचो देवयन्तो अयो न देवा जनिमा धमन्तः ।। शुचन्तो अग्निं ववृधन्त इन्द्रमूर्वं गव्यं प

१५ परिषदंतो अग्मंन्॥ आयूथेवक्षुमतिपश्वो अख्यद्देवानांयज्जनिमांत्युग्र॥ मर्ता
नांचिदुर्वशीरकृप्रन्वृधेचिदर्यउपरस्यायोः॥ अकर्मतेस्वपसो अभूमऋतमव
स्रन्नुषसोविभातीः॥ अनूनमग्निंपुरुधासुश्चंद्रंदेवस्यमर्मृजतश्चारुचक्षुः॥
एताते अग्नउचथानिवेधोवोचामकवयेताजुषस्व॥ उच्छोचस्वकृणुहिवस्यसोनो
महोरायःपुरुवारप्रयंधि॥१२॥ अवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोद
स्योः॥ अग्निंपुरातनयित्नोरचित्ताद्धिरण्यरूपमवसेकृणुध्वं॥ अयंयोनिश्चकृमा
यंवयंतेजायेवपत्यउशतीःसुवासाः॥ अर्वाचीनःपरिवीतोनिषीदेमाउतेस्वपा
कप्रतीचीः॥ आशृण्वतेअदृपितायमन्मनृचक्षसेसुमृळीकायवेधः॥ देवायशस्ति ५५

प्रमर्त्तायशंसग्रावेवसोतामधुषुयमीळे॥ त्वंचिन्नःशम्या अग्ने अस्याऋतस्य
बोध्यृतचित्स्वाधीः॥ कदातउक्थासधमाद्यानिकदाभवंतिसख्यागृहेते॥ कथा
हतद्वरुणायत्वमग्नेकथादिवेगर्हसेकन्नआगः॥ कथामित्रायमीळ्हुषेपृथिव्यै
ब्रवःकदर्यम्णेकद्भगाय॥२०॥ कद्धिष्ण्यासुवृधसानो अग्नेकद्वातायप्रतवसे
शुभंये॥ परिज्मनेनासत्यायक्षेब्रवःकदग्नेरुद्रायनृघ्ने॥ कथामहेपुष्टिंभरायपू
ष्णेकद्रुद्रायसुमखायहविर्दे॥ कद्विष्णवउरुगायायरेतोब्रवःकदग्नेशरवेबृहत्यै
॥ कथशर्धायमरुतामृतायकथासूरेबृहतेपृच्छ्यमानः॥ प्रतिब्रुवोदितयेतुराय
साधादिवोजातवेदश्चिकित्वान्॥ ऋतेनऋतंनियतमीळआगोरामासचामधु

मधुपक्वमग्ने॥ कृष्णासतीरुशताधासिनैषाजामर्येणपयसापीपाय॥ ऋतेन
हिष्मावृषभश्चिदक्तः पुमाँअग्निः पयसापृष्ठ्येन॥ अस्पंदमानोअचरद्वयोधावृ
षाशुक्रंदुदुहेपृश्निरूधः॥ २१॥ ऋतेनाद्रिंव्यसन्भिदंतः समंगिरसोनवंतगो
भिः॥ शुनंनरः परिषदन्नुषासमाविःस्वरभवज्जातेअग्नौ॥ ऋतेनदेवीरमृताअ
मृक्ताअर्णोभिरापोमधुमद्भिरग्ने॥ वाजीनसर्गेषुप्रस्तुभानः प्रसदमित्स्रवितवे
दधन्युः॥ माकस्ययक्षंसदमिद्धुरोगामावेशस्यप्रमिनतोमापेः॥ माभ्रातुरग्नेअ
नृजोरृणंवेर्मासख्युर्दक्षंरिपोर्भुजेम॥ रक्षाणोअग्नेतवरक्षणेभीरारक्षाणः सु
मखप्रीणानः॥ प्रतिष्फुरविरुजवीड्वंहोजहिरक्षोमहिचिद्वावृधानं॥ एभिर्भवसु

५९

मनाअग्नेअर्कैरिमान्स्पृशमन्मभिः शूरवाजान्॥ उतब्रह्माण्यंगिरोजुषस्वसंते
शस्तिर्देववाताजरेत॥ एताविश्वाविदुषेतुभ्यंवेधोनीथान्यग्नेनिण्यावचांसि॥
निवचनाकवयेकाव्यान्यशंसिषंमतिभिर्विप्रउक्थैः॥ २२॥ कृणुष्वपाजःप्रसि
तिंनपृथ्वींयाहिराजेवामवाँइभेन॥ तृष्वीमनुप्रसितिंद्रूणानोस्तासिविध्यरक्षस
स्तपिष्ठैः॥ तवभ्रमासआशुयापतंत्यनुस्पृशधृषताशोशुचानः॥ तपूंष्यग्नेजुह्वा
पतंगानसंदितोविसृजविष्वगुल्काः॥ प्रतिस्पशोविसृजतूर्णितमोभवापायुर्वि
शोअस्याअदब्धः॥ योनोदूरेअघशंसोयोअंत्यग्नेमाकिष्टेव्यथिरादधर्षीत्॥
उदग्नेतिष्ठप्रत्यातनुष्वन्यमित्राँओषतात्तिग्महेते॥ योनोअरातिंसमिधानचक्रे

नीचातंधक्ष्यतसंनशुष्कं॥उर्ध्वोभवप्रतिविध्याध्यस्मदाविष्कृणुष्वदैव्यान्यग्ने॥
अवस्थिरातनुहियातुजूनांजामिमजामिंप्रमृणीहिशत्रून्॥२२॥सतेजानातिसु
मतिंयविष्ठयईवतेब्रह्मणेगातुमैरत्॥विश्वान्यस्मैसुदिनानिरायोद्युम्नान्यर्यो
विदुरोअभिद्यौत्॥सेदग्नेअस्तुसुभगःसुदानुर्यस्त्वानित्येनहविषायउक्थैः
॥पिप्रीषतिस्वआयुषिदुरोणेविश्वेदस्मैसुदिनासासदिष्टिः॥अर्चामितेसु
मतिंघोष्यर्वाक्संतेवावाताजरतामियंगीः॥स्वश्वास्त्वासुरथामर्जयेमास्मे
क्षत्राणिधारयेरनुद्यून्॥इहत्वाभूर्याचरेदुपत्मन्दोषावस्तर्दीदिवांसमनुद्यून्॥
क्रीळंतस्त्वासुमनसःसपेमाभिद्युम्नातस्थिवांसोजनानां॥यस्त्वास्वश्वःसुहिर

५४

ण्योअग्नउपयातिवसुमतारथेन॥तस्यत्राताभवसितस्यसखायस्तआति
थ्यमानुषग्जुजोषत्॥२४॥महोरुजामिबंधुतावचोभिस्तन्मापितुर्गोतमाद
न्वियाय॥त्वंनोअस्यवचसश्चिकिद्धिहोतर्यविष्ठसुक्रतोदमूनाः॥अस्वप्नज
स्तरणयःसुशेवाअतंद्रासोवृकाअश्रमिष्ठाः॥तेपायवःसध्र्यंचोनिषद्याग्ने
र॥ तवनःपांत्वमूरयेपायवोमामतेयंतेअग्नेपश्यंतोअंधंदुरितादरक्षन्ररक्षतान्त्सु नृ॥
कृतोविश्ववेदादिप्संतइद्रिपवोनाहदेभुः॥त्वयावयंसधन्या१स्त्वोतास्तवप्रणी
त्यश्यामवाजान्॥उभाशंसासूदयसत्यतातेनुष्ठुयाकृणुह्यह्रयाण॥अयातेअग्ने
समिधाविधेमप्रतिस्तोमंशस्यमानंगृभाय॥दहाशसोरक्षसःपाह्यां१स्मां

द्रुहोनिदोमित्रमहोअवद्यात्॥२५॥ ॥इतीश्रीतृतीयाष्टकेचतुर्थोध्यायः॥
॥हरिः ॐ वैश्वानरायमीळ्हुषेसजोषाः कथादाशेमाग्नयेबृहद्भाः॥अनूनेनबृ
हतावक्षथेनोपस्तभायदुपमिंनरोधः॥मानिंदतयइमांमह्यंरातिंदेवोददौमर्त्या
यस्वधावान्॥पाकायगृत्सोअमृतोविचेतावैश्वानरोनृतमोयह्वोअग्निः॥साम त
द्विबर्हामहितिग्मभृष्टिःसहस्ररेतावृषभस्तुविष्मान्॥पदंनगोरपगूळ्हंविवि
द्वानग्निर्मह्यंप्रेदुवोचन्मनीषां॥प्रतांऽअग्निर्बभसत्तिग्मजंभस्तपिष्ठेनशोचि
षायःसुराधाः॥प्रयेमिनंतिवरुणस्यधामप्रियामित्रस्यचेततोध्रुवाणि॥अभ्रा
तरोनयोषणोव्यंतःपतिरिपोनजनयोदुरेवाः॥पापासःसंतोअनृताअसत्या

इदंपदमजनतागभीरं॥१॥इदंमेअग्नेकियतेपावकामिनतेगुरुंभारंनमन्म॥
बृहद्दधाथधृषतागभीरंयह्वंपृष्ठंप्रयसासप्तधातु॥तमिन्न्वेवसमनासमा
नासमा नमभिक्रत्वापुनतीधीतिरश्याः॥ससस्यचर्मन्नधिचारुपृश्ने
रग्रेरुपआरुपितंजबारु॥प्रवाच्यंवचसःकिंमेअस्यगुहाहितमुपनिणिग्वद
न्ति॥यदुस्रियाणामपवारिवव्रन्पातिप्रियंरुपोअग्रंपदंवेः॥इदमुत्यन्महिम
हामनीकंयदुस्रियासचतपूर्व्यंगौः॥ऋतस्यपदेअधिदीद्यानंगुहारघुष्यद्रघु
यद्विवेद॥अधिद्युतानःपित्रोःसचासामनुतगुह्यंचारुपृश्नेः॥मातुष्पदेप
रमेअंतिषद्गोर्वृष्णःशोचिषःप्रयतस्यजिह्वा॥२॥ऋतंवोचेनमसापृच्छ्य

धुः॥ नयस्य सातुर्जनितोरवारि नमातरापितरा नूचिदिष्टौ॥ अधामित्रोनसु
धितः पावको३ग्निर्दीदायमानुषीषुविक्षु॥ द्विर्यंपंच जीजनन्त्संवसानाः
स्वसारोअग्निंमानुषीषुविक्षु॥ उषर्बुधमथर्यो३न दंतंशुक्रं स्वासंपरशुंनति
ग्मं॥ तवत्ये अग्नेहरितोघृतस्नारोहितास ऋज्वंचः स्वंचः॥ अरुषासो वृषण
ऋजुमुष्का आदेवतातिमह्वंतदस्माः॥ येहत्येतेसहमानाअयासस्त्वेषासोअग्ने
अर्चयश्चरंति॥ श्येनासोनदुवसनासोअर्थंतुविष्वणसोमारुतंनशर्धः॥ अ
कारिब्रह्मसमिधानतुभ्यंशंसात्युक्थंयजतेव्यूधाः॥ होतारमग्निंमनुषोनिषेदुर्नम
स्यंतउशिजःशंसमायोः॥५॥ अयमिहप्रथमोधायिधातृभिर्होतायजिष्ठोअध्वरे

ष्वीड्यः॥ यमप्नवानोभृगवोविरुरुचुर्वनेषुचित्रंविभ्वंविशेविशे॥ अग्नेकदातआ
नुषग्भुवद्देवस्यचेतनं॥ अधाहित्वाजगृभ्रिरेमर्तासोविक्ष्वीड्यं॥ ऋतावानंवि
चेतसंपश्यंतोद्यामिवस्तृभिः॥ विश्वेषामध्वराणांहस्कर्तारंदमेदमे॥ आशुंदूतं
विवस्वतोविश्वायश्चर्षणीरभि॥ आजभ्रुःकेतुमायवोभृगवाणंविशेविशे॥ तमीं
होतारमानुषक्चिकित्वांसंनिषेदिरे॥ रण्वंपावकशोचिषंयजिष्ठंसप्तधामभिः॥
॥६॥ तंशश्वतीषुमातृषुवनआवीतमश्रितं॥ चित्रंसंतंगुहाहितंसुवेदंकूचिदर्थिनं॥
ससस्ययद्वियुतासस्मिन्नूधन्नृतस्यधामन्रणयंतदेवाः॥ महाँअग्निर्नमसारातह
व्योवेरध्वरायसदमिदृतावा॥ वेरध्वरस्यदूत्यानिविद्वानुभेअंतारोदसीसंचिकित्वान्॥

ऋतईयसे ॰ प्रदिवउरारणो विदुष्टरो दिवआरे धनानि ॥ ऋदृणंतुएमरुःशतः पुरोभा
श्वरिष्णवर्चिर्वपुषामिदेकं ॥ यदप्रवीता दधते ह गर्भं सद्यश्चिज्जातो भवसीदुदूतः ॥
सद्योजातस्य ददृशानमोजो यदस्य वाता अनुवाति शोचिः ॥ वृणक्ति तिग्मामतसे
षुजिह्वां स्थिराचिदन्ना दयते विजंभैः ॥ तृषुयदन्ना तृषुणा ववक्ष तृषुं दूतंकृणुते यह्वो
अग्निः ॥ वातस्य मेळिं सचते निजूर्वं नाशुं नवाजयते हिन्वे अर्वा ॥ ७ ॥ ऋतवो विश्ववेद
सं हव्यवाहममर्त्यं ॥ यजिष्ठमृंजसेगिरा ॥ सहिवेदावसुधितिंमहाँ आरोधनंदिवः ॥
सदेवाँएहवक्षति ॥ सवेदद्देवआनमदेवाँऋतायते दमे ॥ दातिप्रियाणिचिद्वसु ॥ सहो मे
तासेदु दूसंचि किवाँ अंतरीयते ॥ विद्वाँ आरोधनं दिवः ॥ तेस्याममये अग्नयेददाशुर्हव्य ॥५२॥

दातिभिः ॥ यईंपुष्यंतइंधते ॥ तेरायातेसुवीर्यैः ससवांसोविशृण्विरे ॥ येअग्नादधि
रेदुवः ॥ अस्मेरायोदिवेदिवेसंचरंतुपुरुस्पृहः ॥ अस्मेवाजासईरतां ॥ सविप्रश्चर्षणी
नांशवसामानुषाणां ॥ अतिक्षिप्रेवविध्यति ॥ ८ ॥ अग्नेमृळमहाँ असियईमादेवयुं
जनं ॥ इयेथबर्हिरासदं ॥ समानुषीषुदूळभोविक्षुप्रावीरमर्त्यः ॥ दूतोविश्वेषांभुवत्
॥ ससद्मपरिणीयतेहोतामंद्रोदिविष्टिषु ॥ उतपोतानिषीदति ॥ उतग्नाअग्निरध्व
रउतोगृहपतिर्दमे ॥ उतब्रह्मानिषीदति ॥ वेषिह्यध्वरीयतामुपवक्ताजनानां ॥ हव्या
चमानुषाणां ॥ वेषीद्वस्यदूत्यं यस्याजुजोषोअध्वरं ॥ हव्यंमर्तस्यवोळ्हवे ॥ अस्मा
कंजोष्यध्वरमस्माकंयज्ञमंगिरः ॥ अस्माकंशृणुधीहवं ॥ परितेदूळभोरथोस्माँ

त॰सं॰

अश्नोतुविश्वतः॥ येनरक्षसिदाशुषः॥९॥ अग्नेतमद्याश्वंनस्तोमैः क्रतुंनभद्रं
हृदिस्पृशं॥ ऋध्यामातओहैः॥ अधाह्यग्नेक्रतोर्भद्रस्यदक्षस्यसाधोः॥ रथीर्ऋ
तस्यबृहतोबभूथ॥ एभिर्नोअर्कैर्भवानोअर्वाङ्१स्व१र्णज्योतिः॥ अग्नेविश्वे
सुमना भिःसुमनाअनीकैः॥ आभिष्टेअद्यगीर्भिर्गृणंतोग्नेदाशेम॥ प्रतेदिवोनस्तनयंति
शुष्माः॥ तवस्वादिष्ठाग्नेसंदृष्टिरिदाचिदह्नइदाचिदक्तोः॥ श्रियेरुक्मोनरोचत
उपाके॥ घृतंनपूतंतनूररेपाः शुचिहिरण्यं॥ तत्तेरुक्मोनरोचतस्वधावः॥ कृतंचि
द्धिष्मासनेमिद्वेषोग्नइनोषिमर्त्तात्॥ इत्थायजमानादृतावः॥ शिवानःसख्यासं
तुभ्रात्राग्नेदेवेषुयुष्मे॥ सानोनाभिःसदनेसस्मिन्नूधन्॥१०॥ भद्रंतेअग्नेसह

॥५३॥

सिन्ननीकमुपाकआरोचतेसूर्यस्य॥ रुशद्दृशेददृशेनक्तयाचिदरूक्षितंदृशआ
रूपेअन्नं॥ विषाह्यग्नेगृणतेमनीषांखंवेपसातुविजातस्तवानः॥ विश्वेभिर्य
द्वावनःशुक्रदेवैस्तन्नोरास्वसुमहोभूरिमन्म॥ त्वदग्नेकाव्यात्वन्मनीषास्त्वदुक्था
जायंतेराध्यानि॥ त्वदेतिद्रविणंवीरपेशाइत्थाधियेदाशुषेमर्त्याय॥ त्वद्वाजीवाजं
भरोविहायाअभिष्टिकृज्जायतेसत्यशुष्मः॥ त्वद्रयिर्देवजूतोमयोभुस्त्वदाशुर्जूजु
वाँअग्नेअर्वा॥ त्वामग्नेप्रथमंदेवयंतोदेवंमर्त्ताअमृतमंद्रजिह्वं॥ द्वेषोयुतमा
विवासंतिधीभिर्दमूनसंगृहपतिममूरं॥ आरेअस्मदमतिमारेअंहआरेविश्वांदु
र्मतिंयन्निपासि॥ दोषाशिवःसहसःसूनोअग्नेयंदेवआचित्सचसेस्वस्ति॥११॥

यस्त्वामग्न इनधत्ते यतस्रुक् त्रिस्ते अन्नं कृणवत्सस्मिन्नहन्॥ स सु द्युम्नैरभ्यस्तु
प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान्॥ इध्मं यस्ते जभरच्छश्रमाणो महो अग्ने अ
मु नीकमा सपर्यन्॥ स इधानः प्रति दोषामुषासं पुष्यन्रयिं सचते घ्नन्नमित्रान्॥ अग्निरी
शे बृहतः क्षत्रियस्याग्निर्वाजस्य परमस्य रायः॥ दधाति रत्नं विधते यविष्ठो व्यानु
षङ्मर्त्याय स्वधावान्॥ यच्चिद्धि ते पुरुषत्रा यविष्ठाचित्तिभिश्चकृमा कच्चिदागः॥
कृधी षा ऽस्माँ अदितेरनागान्व्येनांसि शिश्रथो विष्वगग्ने॥ महश्चिदग्न एनसो अ
भीक ऊर्वाद्देवानामुत मर्त्यानां॥ मा ते सखायः सदमिद्रिषाम यच्छा तोकाय तनयाय
शं योः॥ यथा ह त्यद्वसवो गौर्यं चित्पदि षिताममुंचता यजत्राः॥ एवो षा ऽस्मन्मुंचता

व्यंहः प्रतार्यग्ने प्रतरं न आयुः॥१२॥ प्रत्यग्निरुषसामग्रमख्यद्विभातीनां सुमना
रत्नधेयं॥ यातमश्विना सुकृतो दुरोणमुत्सूर्यो ज्योतिषा देव एति॥ ऊर्ध्वं भानुं स
विता देवो अश्रेद्द्रप्सं दविध्वद्गविषो न सत्वा॥ अनु व्रतं वरुणो यन्ति मित्रो यत्सूर्यं
दिव्यारोहयन्ति॥ यं सीमकृण्वन्तमसे विपृचे ध्रुवक्षेमा अनवस्यन्तो अर्थं॥ तं सूर्यं ह
रितः सप्त यह्वीः स्पशं विश्वस्य जगतो वहन्ति॥ वहिष्ठेभिर्विहरन्यासि तन्तुमवव्यय
न्नसितं देव वस्म॥ दविध्वतो रश्मयः सूर्यस्य चर्मेवावाधुस्तमो अप्स्व१न्तः॥ अनाय
तो अनिबद्धः कथायं न्यङ्ङुत्तानोऽव पद्यते न॥ कया याति स्वधया को ददर्श दिवः स्कंभः
समृतः पाति नाकं॥१३॥ प्रत्यग्निरुषसो जातवेदा अख्यद्देवो रोचमाना महोभिः॥

आनासत्योरुगायारथेनेमंयज्ञमुपनोयातमछ॥ऊर्ध्वंकेतुंसवितादेवोअश्रेज्ज्यो
तिर्विश्वस्मैभुवनायकृण्वन्॥आप्राद्यावापृथिवीअंतरिक्षंविसूर्योरश्मिभि
श्चेकितानः॥आवहंत्यरुणीर्ज्योतिषागान्महीचित्रारश्मिभिश्चेकिताना॥प्रबोध
यंतीसुवितायदेव्यु१षाईयतेसुयुजारथेन॥आवांवहिष्ठाइहतेवहंतुरथाअश्वा
सउषसोव्युष्टौ॥इमेहिवांमधुपेयायसोमाअस्मिन्यज्ञेवृषणामादयेथा॥अ
नायतो॰॥कयायाति॰॥१४॥अग्निर्होतानोअध्वरेवाजीसन्परिणीयते॥देवोदेवे
षुयज्ञियः॥परित्रिविष्ट्यध्वरंयात्यग्नीरथीरिव॥आदेवेषुप्रयोदधत्॥परिवाज
पतिःकविरग्निर्हव्यान्यक्रमीत्॥दधद्रत्नानिदाशुषे॥अयंयःसृंजयेपुरोदैववा ॥५५॥

तेसमिध्यते॥द्युमाँअमित्रदंभनः॥अस्यघावीरईवतोग्नेरीशीतमर्त्यः॥ति
ग्मजंभस्यमीळ्हुषः॥१५॥तमर्वंतंनसानसिमरुषंनदिवःशिशुं॥मर्मृज्यंते
दिवेदिवे॥बोधद्यन्माहरिभ्यांकुमारःसाहदेव्यः॥अछानहूतउदरं॥उतत्याय
जताहरीकुमारात्साहदेव्यात्॥प्रयतासद्यआददे॥एषवांदेवावश्विनाकुमारः
साहदेव्यः॥दीर्घायुरस्तुसोमकः॥तंयुवंदेवावश्विनाकुमारंसाहदेव्यं॥दीर्घायु
षंकृणोतन॥१६॥आसत्योयातुमघवाँऋजीषीद्रवंत्वस्यहरयउपनः॥तस्माइदंधः
सुषुमासुदक्षमिहाभिपित्वंकरतेगृणानः॥अवस्यशूराध्वनोनांतेस्मिन्नोअद्यसव
नेमंदध्यै॥शंसात्युक्थमुशनेववेधाश्चिकितुषेअसुर्यायमन्म॥कविर्ननिण्यं

विदथानि साधन्वृषा यत्सेकं विपिपानो अर्चात् ।। दिव इत्था जीजनत्सप्त कारून
ह्ना चिच्चक्रुर्वयुना गृणन्तः ।। स्व१र्यद्वेदि सुदृशीकमर्कैर्महि ज्योती रुरुचुर्यद्ध व
स्तोः ।। अन्धा तमांसि दुधिता विचक्षे नृभ्यश्चकार नृतमो अभिष्टौ ।। ववक्ष इन्द्रो अ
मितमृजीष्यु१भे आ पप्रौ रोदसी महित्वा ।। अतश्चिदस्य महिमा विरेच्यभि आ
पप्रौ रोदसी महित्वा ।। अतश्चिदस्य महिमा विरेच्यभि यो विश्वा भुवना बभूव ।। १७ ।।
विश्वानि शक्रो नर्याणि विद्वानपो रिरेच सखिभिर्निकामैः ।। अश्मानं चिद्ये बिभिदु
र्वचोभिर्व्रजं गोमन्तमुशिजो वि वव्रुः ।। अपो वृत्रं वव्रिवांसं पराहन्प्रावत्ते वज्रं पृथि
वी सचेताः ।। प्रार्णांसि समुद्रियाण्यैनोः पतिर्भवञ्छवसा शूर धृष्णो ।। अपो यदद्रिं पु ५६

रुहूत दर्दराविर्भुवत्सरमा पूर्व्यं ते ।। स नो नेता वाजमा दर्षि भूरिं गोत्रा रुजन्नङ्गिरो
भिर्गृणानः ।। अच्छा कविं नृमणो गा अभिष्टौ स्वर्षाता मघवन्नाधमानं ।। ऊतिभि
स्तमिषणो द्युम्नहूतौ नि मायावानब्रह्मा दस्युरर्त ।। आ दस्युघ्ना मनसा याह्यस्तं भु
वत्ते कुत्सः सख्ये निकामः ।। स्वे योनौ नि षदतं सरूपा वि वां चिकित्सदृतचिद्ध नारी ।।
।।१८।। यासि कुत्सेन सरथमवस्युस्तोदो वातस्य हर्योरीशानः ।। ऋज्रा वाजं न गध्यं यु
यूषन्कविर्यदहन्पार्याय भूषात् ।। कुत्साय शुष्णमशुषं नि बर्हीः प्रपित्वे अह्नः कु
यवं सहस्रा ।। सद्यो दस्यून्प्र मृण कुत्स्येन प्र सूरश्चक्रं वृहतादभीके ।। त्वं पिप्रुं मृगयं
शूशुवांसमृजिश्वने वैदथिनाय रन्धीः ।। पञ्चाशत्कृष्णा नि वपः सहस्रात्कं न पुरो जरि

नं॰ ५०
॥५७॥

माविदर्द्दः॥ सूरउपाके तन्वं१ दधानो वियत्ते चेत्यमृतस्य वर्पः॥ मृगो न हस्ती तवि
षी मुषाणः सिंहो न भीम आयुधानि बिभ्रत्॥ इंद्रं कामा वसुयंतो अग्मन्त्स्वर्मीळ्हे
न सवने चकानाः॥ श्रवस्यवः शशमानास उक्थैरोको न रण्वा सुदृशीव पुष्टिः॥१३॥
तमिद्व इंद्रं सुहवं हुवेम यस्ता चकार नर्या पुरूणि॥ यो मावते जरित्रे गध्यं चिन्मक्षू वा
जं भरति स्पार्हराधाः॥ तिग्मा यदंतरशनिः पताति कस्मिंचिच्छूर मुहुके जनानां॥
घोरा यदर्य समृतिर्भवात्यध स्मा नस्तन्वो बोधि गोपाः॥ भुवो वितावा मदेवस्य धीनां
भुवः सखा वृको वाजसातौ॥ त्वामनु प्रमतिमा जगन्मोरुशंसो जरित्रे विश्वध स्याः
॥ एभिर्नृभिरिंद्र त्वायुभिष्ट्वा मघवद्भिर्मघवन्विश्व आजौ॥ द्यावो न द्युम्नैरभि सं ॥५७॥

तो अर्यः क्षपो मदेम शरदश्च पूर्वीः॥ एवेदिंद्राय वृषभाय वृष्णे ब्रह्माकर्म भृगवो
न रथं॥ नू चिद्यथा नः सख्या वियोषदसन्न उग्रो अविता तनूपाः॥ नू ष्टुत इंद्र नू गृणान
इषं जरित्रे नद्यो३ न पीपेः॥ अकारि ते हरिवो ब्रह्म नव्यं धिया स्याम रथ्यः सदासाः॥
॥२०॥ त्वं महाँ इंद्र तुभ्यं ह क्षा अनु क्षत्रं मंहना मन्यत द्यौः॥ त्वं वृत्रं शवसा जघन्वा१
न्त्सृजः सिंधूँरहिना जग्रसानान्॥ तव त्विषो जनिमन्रेजत द्यौ रेजद्भूमिर्भियसा स्वस्य
मन्योः॥ ऋघायंत सुभ्वः१ पर्वतास आर्दन्धन्वानि सरयंत आपः॥ भिनद्गिरिं शव
सा वज्रमिष्णन्नाविष्कृण्वानः सहसान ओजः॥ वधीद्वृत्रं वज्रेण मंदसानः सरन्ना श्री
पो जवसा हतवृष्णीः॥ सुवीरस्ते जनिता मन्यत द्यौरिंद्रस्य कर्ता स्वपस्तमो भूत्॥

नृ॰ ऋ॰ सं॰
॥५८॥

यईंजजानस्वर्यंसुवज्रमनपच्युतंसदसोनभूम॥ यएकइच्च्यावयतिप्रभूमारा
जाकृष्टीनांपुरुहूतइंद्रः॥ सत्यमेनमनुविश्वेमदंतिरातिंदेवस्यगृणतोमघोनः
॥२१॥ सत्रासोमाअभवन्नस्यविश्वेसत्रामदासोबृहतोमदिष्ठाः॥ सत्राभवोवसु
पतिर्वसूनांदत्रेविश्वाअधिथाइंद्रकृष्टीः॥ त्वमधप्रथमंजायमानोमेविश्वाअ
धिथाइंद्रकृष्टीः॥ त्वंप्रतिप्रवतआशयानमहिंवज्रेणमघवन्विवृश्चः॥ सत्राहणं
दाधृषिंतुम्रमिंद्रंमहामपारंवृषभंसुवज्रं॥ हंतायोवृत्रंसनितोतवाजंदातामघा ह
निमघवासुराधाः॥ अयंवृतश्चातयतेसमीचीर्यआजिषुमघवाशृण्वएकः॥ अ
यंवाजंभरतियंसनोत्यस्यप्रियासःसख्येस्याम॥ अयंशृण्वेअधजयन्नुतघ्नन्नय ॥५८॥

मुतप्रकृणुतेयुधागाः॥ यदासत्यंकृणुतेमन्युमिंद्रोविश्वंदृळ्हंभयतएजदस्मा
त्॥२२॥ समिंद्रोगाअजयत्संहिरण्यासमश्वियामघवायोहपूर्वीः॥ एभिर्नृभि
र्नृतमोअस्यशाकैरायोविभक्तासंभरश्चवस्वः॥ कियत्स्विदिंद्रोअध्येतिमातुः
कियत्पितुर्जनितुर्योजजान॥ योअस्यशुष्मंमुहुकैरियर्तिवातोनजूतस्तनयद्भि
रभ्रैः॥ क्षियंतंत्वमक्षियंतंकृणोतीयर्तिरेणुंमघवासमोहं॥ विभंजनुरशनिमाँइ
वद्यौरुतस्तोतारंमघवावसौधात्॥ अयंचक्रमिषणत्सूर्यस्यन्येतशंरीरमत्स
सृमाणं॥ आकृष्णईंजुहुराणोजिघर्तित्वचोबुध्नेरजसोअस्ययोनौ॥ असिक्न्यां
यजमानोनहोता॥२३॥ गव्यंतइंद्रंसख्यायविप्राअश्वायंतोवृषणंवाजयंतः॥ज

नोयंत्तोजनिदामक्षित्तोत्तिमाच्यावयामोवत्तेनकोशं॥आत्तानोबोधिदद्दशानआ
पिरभिख्यात्ताम्डित्तासोम्यानां॥सखापित्तापित्तृतमःपित्तृणांकर्त्तेमुलोकमुश
तेवयोधाः॥सखीयत्तामवित्ताबोधिसखागृणानइंद्रस्तुवत्तेवयोधाः॥वयंह्या
तेचकमासबाधआभिःशमीभिर्महयंत्तइंद्र॥स्तुत्तइंद्रोमघवायद्धवृत्राभूरी
ण्येकोअप्रत्तीनिहंत्ति॥अस्यप्रियोजरित्तायस्यशर्मन्नकिर्देवावारयंत्तेनमर्त्ताः॥
॥एवानइंद्रोमघवाविरप्शीकरत्सत्यावर्षणीधृदनर्वा॥त्वंराजाजनुषांधेह्यस्मे
अधिश्रवोमाहिनंयज्जरित्रे॥नूष्टुत्तइंद्रनूगृणानइषंजरित्रेनद्योनपीपेः॥अ
कारित्तेहरिवोब्रह्मनव्यंधियास्यामरथ्यःसदासाः॥२४॥अयंपंथाअनुवित्तः ५९

पुराणोयत्तोदेवाउदजायंत्तविश्वे॥अत्तश्चिदाजनिपीष्टप्रवृद्धोमामात्तरममु
यापत्तवेकः॥नाहमत्तोनिरयादुर्गहैत्तत्तिरश्चत्तापार्श्वान्निर्गमाणि॥बहूनिमेअकृ
त्ताकर्त्वानियुध्यैत्वेनसंत्वेनपृच्छै॥परायत्तीमात्तरमन्वचष्टननानुगान्यनुनू
गमानि॥त्वष्टुर्गृहेअपिबत्सोममिंद्रःशत्तधन्यंचम्वोःसुत्तस्य॥किंसऋधक्कृणव
द्यंसहस्रंमासोजभारशरदश्चपूर्वीः॥नहीन्वस्यप्रतिमानमस्त्यंतर्जात्तेषूतये
जनित्वाः॥अवद्यमिवमन्यमानागुहाकरिंद्रंमात्तावीर्येणान्यृष्टं॥अथोदस्था
त्स्वयमत्कंवसानआरोदसीअपृणाज्जायमानः॥२५॥एत्ताअर्षंत्यललाभवंत्
तीर्ऋत्तावरीरिवसंक्रोशमानाः॥एत्ताविपृच्छकिमिदंभनंत्तिकमापोअद्रिंपरि

॥६०॥ धिरुजंति॥ किं मुषिदस्मै निविदो भनंतेंद्रस्यावद्यं दिधिषंत आपः॥ ममैतान्पुत्रो
महता वधेन वृत्रं जघन्वाँ असृजद्वि सिंधून्॥ ममच्चन त्वा युवतिः परास मम
च्चन त्वा कुषवा जगार॥ ममच्चिदापः शिशवे ममृड्युर्ममच्चिदिंद्रः सहसोदति
ष्ठत्॥ ममच्चन ते मघवन्व्यंसो निविविध्वाँ अप हनू जघान॥ अधा निविद्ध उ
त्तरो बभूवाञ्छिरो दासस्य सं पिणग्वधेन॥ गृष्टिः ससूव स्थविरं तवागामनाधृ
ष्यं वृषभं तुम्रमिंद्रं॥ अरीळ्हं वत्सं चरथाय माता स्वयं गातुं तन्व इच्छमानं॥ उत
माता महिषमन्ववेनदमी त्वा जहति पुत्र देवाः॥ अथाब्रवीद्वृत्रमिंद्रो हनिष्यन्त्स
खे विष्णो वितरं वि क्रमस्व॥ कस्ते मातरं विधवामचक्रच्छयुं कस्त्वामजिघांसच्च ॥९०॥

रंतं॥ कस्ते देवो अधि मार्डीक आसीद्यत्प्राक्षिणाः पितरं पादगृह्य॥ अवर्त्या शु
न आंत्राणि पेचे न देवेषु विविदे मर्डितारं॥ अपश्यं जायाममहीयमानामधा
मे श्येनो मध्वा जभार॥२९॥ ॥इति श्री तृतीयाष्टके पंचमोध्यायः॥ ॥हरिः ॐ॥
एवा त्वामिंद्र वज्रिन्नत्र विश्वे देवासः सुहवास ऊमाः॥ महामुभे रोदसी वृद्धमृष्वं नि
रेकमिद्वृणते वृत्रहत्ये॥ अवासृजंत जिव्रयो न देवा भुवः सम्राळिंद्र सत्ययोनिः
॥ अहन्नहिं परिशयानमर्णः प्रावर्तनीररदो विश्वधेनाः॥ अतृप्णुवंतं वियत
मबुध्यमबुध्यमानं सुषुपाणमिंद्र॥ सप्त प्रति प्रवत आशयानमहिं वज्रेण वि रि
णा अपर्वन्॥ अक्षोदयच्छवसा क्षाम बुध्नं वार्ण वातस्तविषीभिरिंद्रः॥ दृळ्हान्यौ

भ्नादुशमान ओजोवाभिनत्ककुभः पर्वतानां ॥ अभिप्रदद्रुर्जनयोनगर्भंरथा
इवप्रययुःसाकमद्रयः ॥ अतर्पयोविसृतउब्जऊर्मीन्त्वंवृताँ अरिणाइंद्रसिं
धून् ॥ १ ॥ त्वंमहीमवनिंविश्वधेनांतुर्वीतयेवय्यायक्षरंतीं ॥ अरमयोनम
सैजदर्णः सुतरणाँ अकृणोरिंद्रसिंधून् ॥ प्राग्रुवोनभन्वोनवक्वाध्वस्रा अ
पिन्वद्युवतीरृतज्ञाः ॥ धन्वान्यज्राँ अपृणक्तृषाणाँ अधोगिंद्रःस्तर्योदंसुप
त्नीः ॥ पूर्वीरुषसःशरदश्चगूर्तावृत्रंजघन्वाँ असृजद्विसिंधून् ॥ परिष्ठिता अ
तृणद्बद्धानाःसीरा इंद्रःस्रवितवेपृथिव्या ॥ वम्रीभिःपुत्रमग्रुवोअदानंनि
वेशनाद्धरिवआजभर्थ ॥ ८ ॥ व्यंधोअख्यदहिमाददानोनिर्भूदुखच्छित्समरंतपर्व ॥
६१

प्रतेपूर्वाणिकरणानिविप्राविद्वाँ आहविदुषेकरांसि ॥ यथायथावृष्ण्यानिस्वगू
र्तापांसिराजन्नर्याविवेषीः ॥ नूष्टुत ॥ अकारिते ॥ २ ॥ आनइंद्रोदूरादानआ
सादभिष्टिकृदवसेयासदुग्रः ॥ ओजिष्ठेभिर्नृपतिर्वज्रबाहुःसंगेसमत्सुतुर्वणिः
पृतन्यून् ॥ आनइंद्रोहरिभिर्यात्वच्छार्वाचीनोवसेराधसेच ॥ तिष्ठातिवज्रीमघ
वाविरप्शीमंयज्ञमनुनोवाजसातौ ॥ इमंयज्ञंत्वमस्माकमिंद्रपुरोदधत्सनिष्यसि
नो क्रतुंनः ॥ श्वघ्नीववज्रिन्त्सनयेधनानांत्वयावयमर्यआजिंजयेम ॥ उशन्नुषुणःसु
मनाउपाकेसोमस्यनुसुषुतस्यस्वधावः ॥ पाइंद्रप्रतिभृतस्यमध्वःसमंधसाममदः
पृष्ठ्येन ॥ वियोररप्शऋषिभिर्नवेभिर्वृक्षोनपक्वःसृण्योनजेता ॥ मर्योनयोषामभि

मन्यमानोऽछाविवक्मिपुरुहूतमिंद्रं।। २।। गिरिर्नयः स्वतवाँऋष्वइंद्रः सनादेवस
हसेजातउग्रः।। आदर्तावज्रंस्थविरं नभीमउद्नेवकोशंवसुनान्यृष्टं।। नयस्यवर्ता
जनुषान्वस्तिनराधसआमरीतामघस्य।। उद्वावृषाणस्तविषीवउग्रास्मभ्यंदद्धि
पुरुहूतरायः।। ईक्षेरायः क्षयस्यचर्षणीनामुतव्रजमपवर्तासिगोनां।। शिक्षानरः
समिथेषुप्रहावान्वस्वोराशिमभिनेतासिभूरिं।। कयातच्छृण्वेशच्याशचिष्ठोय
याकृणोतिमुहुकाचिदृष्वः।। पुरुदाशुषेविचयिष्ठोअंहोथादधातिद्रविणंजरित्रे।।
मानोमर्धीराभरादद्धितन्नः प्रदाशुषेदातवेभूरियत्ते।। नव्येदेष्णेशस्तेअस्मिंत
उक्थेप्रब्रवामवयमिंद्रस्तुवंतः।। नूष्टुत०।। अकारिते०।। ७।। आयात्विंद्रोवसउप ६२
नइहस्तुतः सधमादस्तुशूरः।। वावृधानस्तविषीर्यस्यपूर्वीर्द्यौर्नक्षत्रमभिभूति
पुष्यात्।। तस्येदिहस्तवथवृष्ण्यानितुविद्युम्नस्यतुविराधसोनॄन्।। यस्यक्र
तुर्विदथ्योनसम्राट्साह्वाँतरुत्रोअभ्यस्तिकृष्टीः।। आयात्विंद्रोदिवआपृ
थिव्यामक्षुसमुद्रादुतवापुरीषात्।। स्वर्णरादवसेनोमरुत्वान्परावतोवासदना
दृतस्य।। स्थूरस्यरायोबृहतोयईशेतमुष्टवामविदथेष्विंद्रं।। योवायुनाजयति
गोमतीषुप्रधृष्णुयानयतिवस्योअछ।। उपयोनमोनमसिस्तभायन्नियर्ति
वाचंजनयन्यजध्यै।। ऋंजसानः पुरुवारउक्थैरेंद्रंकृण्वीतसदनेषुहोता।। ५।। धि
षायदिधिषण्यंतः सरण्यान्सदंतोअद्रिमौशिजस्यगोहे।। आदुरोषाः पास्त्यस्यहो

तायोनोमहात्संवरणेषुवह्निः॥सत्रायदीं भार्वरस्य वृष्णः सिषक्तिशुष्मः स्तुव
तेभराय॥गुहायदीमौशिजस्यगोहेप्रयद्धियेप्रायसेमदाय॥विपद्वरांसिपर्वत
स्य वृण्वेपयोभिर्जिन्वेअपांजवांसि॥विदद्गौरस्यगवयस्यगोहेयदीवाजाय
सुध्यो३वहंति॥भद्रातेहस्तासुकृतोतपाणीप्रयंतारास्तुवतेराधइंद्र॥कातेनि
षत्तिकिमुनोममत्सिकिंनोदुदुहर्षसेदातवाउ॥एवावस्वइंद्रःसत्यःसम्राड्ढंता
वृत्रंवरिवःपूरवेकः॥पुरुष्टुतक्रत्वानःशग्धिरायोभक्षीयतेवसोदैव्यस्य॥नू
ष्टुतइंद्र०॥अकारिते०॥६॥यंनइंद्रोजुजुषेयच्चवष्टितंनोमहान्करतिशुष्म्या
चित्॥ब्रह्मस्तोमंमघवासोममुक्थायोअश्मानंशवसाबिभ्रदेति॥वृषावृषंधिं ॥६३॥

चतुरश्रिमस्यन्नुग्रोबाहुभ्यांनृतमःशचीवान्॥श्रियेपरुष्णीमुषमाणऊर्णांय
स्याःपर्वाणिसख्यायविव्ये॥योदेवोदेवतमोजायमानोमहोवाजेभिर्महद्भिश्च
शुष्मैः॥दधानोवज्रंबाह्वोरुशंतंद्याममेनरेजयत्प्रभूम॥विश्वारोधांसिप्रव
तश्चपूर्वीर्द्यौरृष्वाज्जनिमन्रेजतक्षाः॥आमातराभरतिशुष्म्यागोर्नृवत्परि
ज्मंनोनुवंतवाताः॥तातुतइंद्रमहतोमहानिविश्वेष्वित्सवनेषुप्रवाच्या॥यच्छू
रधृष्णोधृषतादधृष्वानहिंवज्रेणशवसाविवेषीः॥७॥तातुतेसत्यातुविनृम्ण
विश्वाप्रधेनवःसिस्रतेवृष्णऊध्नः॥अधाहत्वद्वृषमणोभियानाःप्रसिंधवोज
वसाचक्रमंत॥अत्राहतेहरिवस्ताउदेवीरवोभिरिंद्रस्तवंतस्वसारः॥यत्सीम

नुप्रमुचो बद्बधाना दीर्घामनुप्रसितिंस्यंदयध्यै ॥ पिपीळे अंशुर्मद्यो नसिंधुरा
त्वाशमीशशमानस्यशक्तिः ॥ अस्मद्र्यक्छुशुचानस्ययम्या आशुर्नरश्मिंतु
व्योजसंगोः ॥ अस्मेवर्षिष्ठाकृणुहिज्येष्ठा नृम्णानिसत्रासहुरेसहांसि ॥ अस्म
भ्यंवृत्रासुहनानिरंधिजहिवधर्वनुषोमर्त्यस्य ॥ अस्माकमित्सुशृणुहित्वमिंद्रा
स्मभ्यंचित्राँ उपमाहिवाजान् ॥ अस्मभ्यंविश्वाइषणःपुरंधीरस्माकंसुमघ
वन्बोधिगोदाः ॥ नूष्टुतइंद्र ॥ अकारिते ॥ ८ ॥ कथामहामवृधत्कस्यहोतुर्यज्ञं
जुषाणोअभिसोममूधः ॥ पिबन्नुशानोजुषमाणोअंधोववक्षऋष्वःशुचतेध
नाय ॥ कोअस्यवीरःसधमादमापसमानंशसुमतिभिः ॥ कोअस्य ॥ कदस्यचि